
राजहंस संस्कृत निबन्ध

डॉ. आर. एन. गौड़



राजहंस प्रकाशन मन्दिर, मेरठ

राजहंस

संस्कृत निबन्ध

लेखक :

डॉ० आर० एन० गौड़, एम० ए०, पी-एच० डी०

साहित्यरत्न, आचार्य, पी० ई० एस०

पूर्व-प्राचार्य,

गवर्नमेण्ट कॉलिज, मेरठ।

("राजहंस हिन्दी निबन्ध", "राजहंस इण्टरमीडिएट हिन्दी भाषा-भास्कर" "राजहंस हाई स्कूल हिन्दी भाषा-भास्कर", राजहंस जूनियर हाई स्कूल हिन्दी भाषा-भास्कर", "हिन्दी साहित्य क सरल इतिहास" "कमला नेहरु खण्ड काव्य" आदि प्रसिद्ध पुस्तकों के रचयिता।)

प्रकाशक :

राजहंस प्रकाशन मन्दिर

धर्म-आलोक, रामनगर, मेरठ (उ॰प्र॰)

प्रकाशक :
एम० पी० गोयल
राजहंस प्रकाशन मन्दिर (रजि०)
धर्म-आलोक, रामनगर,
मेरठ (उ० प्र०)।

वितरक :
राजहंस एजेन्सीज़
धर्म-आलोक, रामनगर,
मेरठ (उ० प्र०)।

तार : 'राजहंस' मेरठ।
फोन : कार्यालय : २२३५८
डिपो : २७१३८
प्रेस : ७६५९५
पंकज : २२८९२
निवास : ७२२०१

प्रथम संस्करण १९९४

मूल्य : १५·०० रुपये मात्र

मुद्रक :
हीरा प्रिंटर्स, मेरठ।
राजहंस प्रेस,
राजहंस नगर, गढ़ रोड,
मेरठ (उ० प्र०)।

निवेदनम्

संस्कृतस्य माहात्म्यम् विश्वविदितम् सर्वैः स्वीकृतम् च । संस्कृतम् हि देव भाषा। इयम् अमराणाम् वाणी। हिन्दी भाषायाम् राजहंस हिन्दी निबन्धादीनि अनेकानि पुस्तकानि मया लिखितानि, साम्प्रतम् हिन्दी-मोहम् परित्यज्य भारतवर्षस्य संस्कृतानुरागिणाम् महाभागानाम्, सुकुमारमति अन्तेवासिनाम् कृते देववाण्याम् मया एषः प्रयासः विहितः। संस्कृत भाषायाः ज्ञानम् सरलतया स्यात् इति दृष्ट्या वाक्येषु सन्धि-विधानम्, समास विधानम् वा न कृतम् अस्ति। सुगमतायाः दृष्ट्या शब्दावलि अपि सरला, सुबोधा, सुलभा, सुललिता च प्रयुक्ता। पुस्तकान्ते अमूल्यानि सुभाषितरत्नानि अपि विदुषाम्, चिन्तकानाम् च कृते संग्रहीतानि।

मुद्रणस्य अन्याः वा त्रुटयः निश्चित रूपेण यत्र-तत्र जाताः स्युः, तासाम् निराकरणस्य प्रयासः द्वितीये संस्करणे यथाशक्तिः करिष्यते। इदानीम् तु इयम् लघ्वी कृतिः अनया आशया संस्कृतानुरागिभ्यः समर्प्यते यत् ते इमाम् स्वीकरिष्यन्ति।

पुस्तकमिदम् छात्राणाम् परीक्षार्थिनाम् तथा संस्कृत ज्ञातुकामानाम् भृशम् उपकरिष्यति इति कामये।

अगस्त १६, १९९३

—डॉ० आर० एन० गौड़
एम० ए०, पी-एच० डी०,
पी० ई० एस०

Publisher's Note

Long awaited "RAJHANS SANSKRIT NIBANDH" is your hands. It's author Dr. R. N. Gaur is an eminent scholar a Porolific writer in Hindi Literature".

His work "RAJHANS HINDI NIBANDH" has been sellin like hot cake since last 40 years. Forty editions of this boo shows the eloquent testimony to Dr. Gaur's immense popularit among the students, teachers and general readers.

Dr. Gaur's simplicity of expression, gracefulness anc persuasiveness of style in Sanskrit would make an endalible mark on the readers, through "Rajhans Sanskrit Nibandh" I hope.

I am sure, the present work will be liked by them for whom it is meant.

—Mahendra Prasad Goel

संस्कृत निबन्ध लेखन के विषय में ज्ञातव्य कुछ बातें

"निःशेषेण बध्यन्ते विचाराः अस्मिन्निति निबन्धः" अर्थात् उस गद्य-रचना को निबन्ध कहते हैं जिसमें किसी विषय का निःशेष अर्थात् साङ्गोपाङ्ग विवेचन किया जाता है। इस प्रकार किसी विषय के स्वरूप, उपयोग तथा महत्त्व आदि का सरल एवं सुबोध भाषा में विवेचन करना ही निबन्ध कहलाता है। संस्कृत में निबन्ध लिखने के लिए सन्धि, कारक तथा समासादि का अच्छी प्रकार अभ्यास कर लेना चाहिए।

निबन्ध लेखन के लिए कुछ आवश्यक निर्देश :—

१. किसी विषय पर निबन्ध लिखना प्रारम्भ करने से पूर्व उस विषय पर अच्छी प्रकार से विचार कर लेना चाहिये। निबन्ध में सुन्दर विचारों का संकलन अपेक्षित है।

२. निबन्ध लिखते समय छोटे-छोटे वाक्यों का प्रयोग करना चाहिए।

३. भाषा सरल एवम् प्रवाहपूर्ण होनी चाहिए। सुन्दर तथा प्रचलित शब्दों का प्रयोग किया जाना चाहिये, अप्रचलित शब्दों का प्रयोग नहीं करना चाहिए।

४. निबन्ध में दीर्घ, सन्धि, समास तथा पुनरुक्ति से बचना चाहिये।

५. निबन्ध में सुभाषितों, मुहावरों एवम् सूक्तियों का प्रयोग अच्छा माना जाता है।

६. दृष्टान्त देते समय पूरा कथानक नहीं लिखना चाहिये। केवल उसका संकेत मात्र कर देना चाहिए।

७. अपने विचारों के समर्थन में एक-दो श्लोक उद्धृत किया जा सकता है।

८. निबन्ध की रचना करते समय व्याकरण सम्बन्धी अशुद्धियों पर ध्यान रखना चाहिये।

९. विराम चिह्नों का सावधानीपूर्वक प्रयोग करना चाहिये।

१०. पहिले अंग्रेजी या हिन्दी या अपनी भाषा में विषय-सम्बन्धी छोटे-छोटे वाक्य बना लीजिए फिर इनको छोटे-छोटे वाक्यों में संस्कृत में अनुवाद कर दीजिये बस निबन्ध हो गया।

१. स्वातन्त्र्योद्घोषकम् अस्माकम् नगरम्

अस्माकम् नगरस्य नाम मयराष्ट्र: (मेरठ) अस्ति। दिल्ली नाम्न: भारत वर्षस्य राजपीठस्य नातिदूरे, उत्तर प्रदेशस्य पश्चिम तटे स्थितम् इदम् नगरम् परमां शोभाम् आसादते। मेरठ मण्डलस्य इदम् नगरम् मुख्यालयम् वर्तते। अत्रैव आयुक्तादय: मण्डलीय प्रधान शासका: निवर्सान्त। इदम् पत्तनम् एकम् प्रसिद्धम् शिक्षा केन्द्रम्, प्रथितम् व्यापारिक केन्द्रञ्च अस्ति।

अत्रैव भगवत: शंकरस्य प्राचीनतमम् सिद्धपीठम् 'औघड़नाथ मन्दिरम्' अस्ति। शिवालयमिदम् "काली पल्टन का मन्दिर" इत्यपि कथ्यते जनै:। अस्मात् पावनात् स्थानादेव स्वतन्त्रताया: प्रथम उद्घोष: भारताकाशे गुंजयमानो ऽ भूत् जनै;। स्वतन्त्रता संग्रामस्य शुभारम्भमिमं 'सैनिक विद्रोह:' इत्यपि कथ्यते इतिहास विशेषज्ञै:। अत: अस्य नगरस्य राजनैतिकम् महन्महत्त्वं अस्ति। इयम् नगरी रावणस्य भार्याया: मन्दोदर्या: जन्म-स्थली अस्ति, अत्रैव दशमुखस्य श्वसुरगृहम् आसीत्। अत्रैव आगत्य श्रवण कुमार: मातृ-पितृभक्ति-विहीनो जात:। अस्य नगरस्य भूमिप्रभावात् तस्य बुद्धि विपर्ययोऽभवत् इत्येषा जनश्रुति:। स्वार्थ लिप्ता मनोवृत्ति: अस्य नगरस्य नागरिकाणाम् इत्यपि अनुभूयते पर नगर निवासिभि:।

अस्मिन् नगरे सुविख्यात: मेरठ विश्व विद्यालय: अपि विराजते। विश्व विद्यालयात् सम्बद्धा: अनेका: महाविद्यालया: सन्ति। तेषु सहस्रश: छात्रा: विविधान् विषयान् पठन्ति पदवीं च लभन्ते। अत्रत्य: लाला लाजपतराय स्मारक: चिकित्सा महाविद्यालय: बहुप्रसिद्ध: अस्ति। शिक्षा-क्षेत्रे इदम् नगरम् अत्यधिकम् समुन्नतम् वर्तते।

इदम् नगरम् एकम् प्रथितम् व्यापारिक केन्द्रम् अपि अस्ति। वस्त्रस्य निर्माणे अत्रत्यं हस्त-कला-कौशलम तु भारत प्रसिद्धम्। 'कैंची' निर्माण उद्योगे वैशिष्ट्यम् अपि अस्य नगरस्य ख्यातिम् वर्धते एव। पुस्तक-प्रकाशन व्यवसाये तु नास्ति अस्य समता उत्तर भारते।

चैत्र मासे नवरात्र्याम् प्रतिवर्षं उत्तर भारते प्रख्यात: साम्प्रदायिक सौहार्द्र सूचक:, विभिन्न आँचलिकानाम् व्यापारिणाम् कृते समृद्धि वर्धक: 'नौचन्दी' इति नाम्ना प्रसिद्ध: मेलापक: अपि अत्र भवति। हिन्दू-मुस्लिम एकताया: प्रतीके अस्मिन् मेलापके एकत: वाले मियाँ महोदयस्य समाधिस्थलम् (मजार इति कथ्यते उर्दू भाषायाम्) अपरत: महामायाया: नवचण्डिकाया: देवालयम् वर्तते। जना: समाधिस्थलस्य उपरि विस्तीर्णानि वस्त्रावरणानि अर्पयन्ति, देवालये च जगदम्बिकाम् धूप-दीपादिभि: अर्चयन्ति।

२. अस्माकम् गृहम्

अस्माकम् गृहम् 'रेलवे रोड' इति प्रसिद्धे राजमार्गे स्थितम् अस्ति। सुरम्यम् इदम् स्थानम् सिटी स्टेशनस्य उपकण्ठ भूमिषु विराजते अतः स्थलमिदं नितान्त एकान्ते वर्तते।

अस्मिन् अस्माकम् गृहे चत्वारः कक्षाः सन्ति। तथाहि-एकस्मिन् कक्षे आगन्तुकानाम् महानुभावानाम् मिष्टान्नेन, लवणान्नेन, फलेन, जलेन, मधुरवाण्या वा स्वागतम् विधीयते। अन्यस्मिन् कक्षे अध्ययनं-अध्यापनञ्च सम्पाद्यते, तत्र स्थित्वा वयम् त्रयोऽपि भ्रातर : स्व-स्व पाठम् स्मरन्ति, स्वाध्यायं कुर्वन्ति च। तृतीये कक्षे वयम् माता-पितृभ्याम् सह शयनम् कुर्वन्ति। अन्तिमे चतुर्थे कक्षे भगवत्याः महामायायाः दुर्गायाः पूजा-पीठं विराजते, तत्र स्थित्वा वयम्, सर्वे त्रयः भ्रातरः, तिस्त्रः भगिन्यः, तातपादाः, मातृचरणाश्च भगवत्याः पूजाम् अर्चनाम् च कुर्वन्ति।

अस्माकम् गृहे अन्यानि अपि आवश्यकीयानि स्थानानि सन्ति। तत्र एका सुविस्तीर्णा पाकशाला, एकं स्नानगृहम्, एकं पुरीषालयं अस्ति। गृहमध्ये एकम् विशालम् अजिरम् चापि शोभते। तत्र विवाहेषु अन्य संस्कारेषु च मण्डपं विरच्यते। अत्र यदा कदा महिलाभिः गायनं, वादनं, नर्तनञ्च क्रियते।

इदम् गृहम् परितः पादपाः शोभन्ते। तेषु केचन पुष्पवृक्षाः, केचन फल वृक्षाः काश्चन लताश्च सन्ति। अस्मिन् गेहे अष्ट संख्याकाः प्राणिनः निवसन्ति तथा हि तातपादाः, मातृचरणाश्र। त्रयः भ्रातरः, तिस्त्रः, भगिन्यः। सर्वे पितुः आज्ञां पालयन्ति।

३. अस्माकम् ग्रामः

भारतवर्षः कृषि प्रधानो देशः। कृषि-व्यापारः ग्रामेषु भवति। कृषकाः ग्रामवासिनः। अतः ग्रामाणाम् माहात्म्यं महत्त्वं च सर्वदा अभिगीयते विद्वद्भिः। ग्रामेषु यदि सत् शिक्षायाः अभावः न स्यात् तदा सरलाः शिष्टाः, मिष्टाः श्रमशीलाः, परोपकारिणः, सहानुभूतिपराः, आचार शीलाः, वाग्वैचित्र्य रहिताः ग्रामवासिनः देवतुल्याः एव।

मंगलपुर नामकः अस्माकम् ग्रामः मयराष्ट्रात् नातिदूरे एव वर्तते। अस्माकम् ग्रामे चत्वारः जनमार्गाः, अष्ट प्रतोल्यः अष्टाधिकशत भवनानि सन्ति। पञ्चशत संख्याकाः जन संख्या अस्ति अस्माकम् ग्रामस्य। अत्र एकस्यां प्रतोल्यां ब्राह्मणाधिवासः, अपरस्यां व वणिजां निवासः, अन्यस्याम् क्षात्रियाः निवसन्ति अपरेऽपि सुख-शान्ति पूर्वकम् भ्रातृत्व भावनया वसन्ति च।

अस्माकम् ग्रामस्य नैसर्गिकी शोभा कस्य मनः न हरति। कुत्रचित् ग्रामबालाः घटैः पादपान् सिंचन्त्यः शोभन्ते। कुत्रचित् कृषीवलाः क्षेत्रं कर्षन्तः अवलोक्यन्ते। कुत्रचित् वृद्धाः निज भवन-प्रकोष्ठ चत्वरे तिष्ठन्तः गृहरक्षां कुर्वन्तः तमालपत्रं बहुशः खादयन्ति गोष्ठी सुखं अनुभवन्ति च। इमानि मृत्तिका निर्मितानि गृहाणि, गोमय लिप्तानि चत्वराणि, कपिलाः श्यामाश्च धेनवः क्रीडन्तः शिशवः, गृहकार्यं सम्पादयन्त्यश्च युवत्यः विलोक्यन्ते।

वयं ग्रामीणाः सरलेन येन केन स्वल्पेनैव वस्तुजातेन जीवनं यापयामः। कृषिम् कुर्मः। धारोष्णम् दुग्धम् पिबामः। तक्रमपि स्वादयामः। अस्माकम् ग्रामस्य मध्ये भगवतः आशुतोषस्य महादेवस्य मन्दिरम् अस्ति। अत्र प्रतिवर्षं फाल्गुणमासे शिवरात्रौ मेलापकः भवति। मन्दिरस्यैव प्रदेशे प्रतिचन्द्रवासरं एकं हट्टं भवति यत्र जनाः दूर दूर लघु ग्रामात् आगत्य वस्तु जातानि क्रीणन्ति।

सर्वमेव अस्माकम् ग्रामस्य दृश्यं सरलं मनोज्ञञ्च।

४. विद्यालयस्य वार्षिकोत्सवः

प्रायः प्रतिवर्षे विद्यालयाः स्वकीयां संस्थापना तिथिं महता उत्साहेन समारोहेण च संस्मरन्ति। पूर्व वर्षे कृत कर्मणाम् उपार्जित फलानां संग्रहीत-धनानाम् विवरणञ्च जनता-समक्षे प्रस्तुतं कुर्वन्ति। विद्यालय संस्थापकाः अस्मिन् अवसरे संस्थायाः उन्नत्या गौरवेण च हर्षिताः दृश्यन्ते। प्रधानाचार्य महोदयाः स्व अध्यापकैः सह विविधान् कार्यक्रमान् दर्शकाणां समक्षे आरम्भयन्तः दृश्यन्ते, छात्राश्च द्विगुणोत्साहेन निज-निजाध्यापक संकेतेन कार्य कुर्वन्तः अवलोक्यन्ते।

अस्मिन् वर्षे विद्यालयस्य वार्षिक महोत्सवासरे लब्ध प्रतिष्ठाः आंगल विद्या विशारदाः मेरठ विश्व विद्यालयस्य पूर्व उपकुलपतयः डाक्टर रमेश मोहन महोदयाः सभापति पदं अलञ्चक्रुः। अस्मिन अवसरे बहवः नगर प्रसिद्धाः विद्वांसः, वैभवशालिनः, प्रबन्धक मण्डल सदस्याः एकत्रिताः आसन्।

कार्यक्रम-आरम्भ वेलायाम् छात्रैः सुमधुरेण स्वरेण स्वागत गीतम्, तदनन्तरं शिशूनां कविता पाठं, भाषणं, संगीतञ्च अतीव मनोहरं आसीत्। अस्मिन् अवसरे सभापति महोदयानां सारगर्भित भाषणमपि अभवत्। कार्यक्रमान्ते पारितोषिक वितरण कार्यं सम्पन्नमभूत्। केचन क्रीड़ा कुशलाः, केचन शिक्षा कुशलाः केचन अनुशासन कुशलाः छात्राः पारितोषिकम् प्राप्तवन्तः।

समारोहावसाने मिष्टान्नम् फलानि च वितरितानि। प्रधानाचार्येण एकस्य दिवसस्य अवकाशः घोषितः। तदनन्तरं छात्राः सहर्षं स्वगृहं प्रस्थिताः।

५. ग्रीष्मावकाशः कथं यापितः

परीक्षा फलं श्रुत्वा हर्षित मानसः अहं कतिपयैः सहपाठिभिः सह कमपि पर्वतीय प्रदेशं दृष्टुकामः विगते ग्रीष्मावकाशे नैनीताल नामकम् नगरम् गमनाय मतिं अकुर्वम्। महता उत्साहेन सकलां यात्रा सामग्रीं एकत्रीकृत्य वयम् सर्वे ज्येष्ठ मासस्य शुक्ले पक्षे एकादश्यां प्रातः। षट्वादन वेलायां वाष्पयान विराम स्थानं प्राप्ताः निर्धारित समयेन, वाष्प यानेन प्रचलिताः।

अन्येद्युः प्रातः वयम् 'काठगोदाम' इति नामकं वाष्प-यान विराम स्थानं (स्टेशन) प्राप्ताः। तत्र यानात् अवतीर्य मोटर शकटेन नयनाभिरामं नैनीतालं प्रति प्रस्थिताः। मार्गे मनोहारि दृश्यं पश्यन्तः आत्मानमपि विस्मृतवन्तः। अचिरादेव वयम् नैनीतालं प्राप्ताः।

प्रथममेव नयनाभिरामाम् 'नैनीलेक' इति नाम्ना प्रसिद्धां पुष्करिणीं दृष्ट्वा आनन्द मग्नाः जाताः। अस्याः पुष्करिण्याः सायंतनं दृश्यं अद्यापि हृत्पटले अंकितमेव। तस्याः रमणीये कूले सुन्दराः युवानः युवतयश्च, क्रीडन्तः बालाः, लगुडहस्ताः वृद्धाश्च भ्रमन्तः, तिष्ठन्तः, वार्त्तालापं कुर्वन्तः अवलोक्यन्तेस्म। कुत्रचित् नौका विहारार्थम् नावः प्लवन्ते। केचन स्नानं कुर्वतः, केचन प्रक्षालनं कुर्वतः, केचन क्रीड़ा रस निमग्नाः दृष्टिपथं आयान्ति स्म।

अन्यस्मिन् अहनि वयम् नैनीताल पर्वतस्य 'चीनापीक' इति प्रसिद्धं सर्वोच्चं शिखरम् दृष्टुं तत्र प्रस्थिताः। तत्रत्यां सुषमां दृष्ट्वा अन्येद्युः 'नन्दा देवी' 'नैनी देवी' इति नाम्न्योः देव्योः पूजां, अर्चनां, पादाभिवन्दनाञ्च कृत्वा पुनः स्वनगरं प्रत्यावर्तिताः।

एवम् ग्रीष्मावकाशस्य क्षणानि व्यतीतानि॥

६. तीर्थराजः प्रयागः

प्रयागराजस्य सर्वत्रैव यशोगानं गीयते विशेषतः पुराणेषु, रामायणादिषु महाकाव्येषु च। भौगोलिक दृष्ट्या भारतवर्षस्य उत्तर प्रदेश राज्ये प्रयागराजः स्थितः। अत्र गंगा-यमुना-सरस्वतीनाम् सितासित पावने जले स्नानं कृत्वा मनुजाः पाप रहिताः भवन्ति इति विश्वस्यते धार्मिकैः जनैः। ब्रह्मणा अत्र प्रकृष्ट याग करणात् अस्य संगमस्थलस्य नाम प्रयागः अभवत्।

माघ मासे लक्षाधिकाः जनाः प्रतिवर्षं अत्रागत्य संगमस्य पवित्रे जले स्नात्वा स्वकीयम् भौतिक शरीरं पावयन्ति, सिद्धपुरुषाणाम् दर्शनेन विदुषां उपदेशामृतेन च अन्तरात्मनाम् अपि प्रक्षालयन्ति। ऋषेः भारद्वाजस्य आश्रमः अपि प्रयागे एव स्थितः आसीत् यत्र प्राचीन समये दश सहस्र मिताः अन्तेवासिनः अधीतिनः आसन्।

अकबर नामकः मुगल शासकः अत्रैव गंगायमुनाभ्याम परिवृतं दृढ़ं दुर्गमकारयत्। वर्षाऋतौ गंगायाः असह्य धारा प्रवाहात् दुर्गस्य रक्षणाय विशालं बन्धमप्यकारयत्। यः अद्यापि गंगायाः नगरस्य च मध्ये सीमारेखा इव स्थितः। अकबरः स्वकीयस्य 'इलाही' धर्मस्य अनुसारेण प्रयागराजस्य नाम 'इलाहाबाद' इत्यकरोत्। इदं दुर्गम् अतीव विशालं सुदृढमस्ति।

प्रयागे पण्डित मोती लाल नेहरू महाभागस्य विशाले प्रासादे एव स्वतंत्रता आन्दोलनस्य प्रधान कार्यालयः आसीत्। सम्पूर्ण भवनम् 'स्वराज्य भवन' इति नाम्ना प्रसिद्धिमवाप्तम् स्वतन्त्रता संग्रामकाले। इयमेव क्रीडास्थली एवं कर्मस्थली अस्माकम् राष्ट्रनायकस्य पण्डित जवाहर लाल नेहरू महाभागस्य।

देश-विदेशैः छात्रैः परिवृतः विविध विद्या पारंगतैः विद्वद्भिः उपशोभितः प्रयाग विश्व विद्यालयः अत्रैव शोभते। अस्य विश्व विद्यालयस्य या कीर्तिः सा न कस्यापि अन्यस्य विश्व विद्यालयस्य। प्रान्तस्य सर्वोच्च न्यायालयः अत्रैव विराजते। हिन्दी-प्रचार-प्रसारे समर्पितम् हिन्दी साहित्य सम्मेलनम् अपि अत्र स्थितम्। प्रति कुम्भम् कोटिशः जनाः सुदूरदूरात् आगत्य गंगायमुनयोः संगमे स्नान्ति कृतार्थयन्ति च आत्मानम्। महाकविना कालिदासेम सत्यमेव उक्तम्:-

समुद्रपत्न्योः जल सन्निपाते, पूतात्मनामत्र किलाभिषेकात्।

तत्त्वावबोधन विनापि भूयः तनुज्यजां नास्ति शरीरबन्धः॥

(७) मम प्रियतमः अध्यापकः

अस्माकं विद्यालये विंशति अध्यापकाः सन्ति। ये विद्वांसः गुणिनश्च सन्ति। ते सर्वे एव मम पूज्या अध्यापकाः सन्ति। तेषु अध्यापकेषु श्रीमन् रूपचन्दः शास्त्रिः मम प्रियतमः अध्यापकः अस्ति।

श्रीमान् रूपचन्द शास्त्रिः त्रिंशत् वर्षीयः अध्यापकः अस्ति। सःसंस्कृत साहित्ये स्नातकोत्तरं (एम.ए.) परीक्षां उत्तीर्य शोध-प्रबन्धं लिखित्वा प्रवक्ताः अभवत्। सः अस्मान् संस्कृतं पाठयति। असौ मधुरभाषीः, आस्तिकः, सदाचारी, धार्मिकः, सुशीलः च अस्ति। स कदापि धूम्रपानं सुरापानं वा न करोति।

तस्य अध्यापन विधि सुस्पष्टा, सरला, सुबोधा च अस्ति। असौ विद्यावारिधिः। सः यथा छात्रान् उपदिशति तथैव स्वयमपि कार्यं करोति। सः सर्वदा प्रियं हितं च वचनं वदति। सः सर्वदा सर्वान् छात्रान् अध्ययने प्रेरयति। सः सदा छात्राणां हितम् इच्छति। स स्व उत्तरदायित्वं सम्यक् निर्वहति। अतएव न केवलं छात्राः अपितु शिक्षकवर्गः अपि तं भूयः प्रशंसन्ति॥ एतादृशाः एव गुरवः यदि सर्वत्र भवेयुः तर्हि श्लोकमिदमत् चरितार्थभ् स्यात्—

अज्ञान तिमिरान्धस्य ज्ञानाञ्जन-शलाकया।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः॥

एतादृशानाम् गुरुवर्याणाम् कृते एवं उच्यतेः-

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परब्रह्म तस्मै श्री गुरवे नमः॥

(८) मम विद्यालयः

असारेऽस्मिन् संसारे सारभूतं वस्तु विद्यैव वर्तते। विद्यालयः विद्यायाः केन्द्रं भवति। मम विद्यालयः नगरादविदूरे वर्तते। विद्यालयं परितः एका दृढाभित्तिः विरचिता अस्ति। मुख्यद्वारेण प्रवेश काले वाटिकायाः सुमनोहराणि सुमनानि उभयतः भवतां स्वागतं कुर्वन्ति। अस्य वातावरणम् अतीव मनोहरम् अस्ति। सर्वतः शुद्धः वायुः वहति।

द्वार समीपे प्रधानाचार्यस्य कार्यालयः लिपिकानां च कार्यालयः स्थितोऽस्ति। समीपे एवं पुस्तकालयोऽपि वर्तते। अस्मिन् पुस्तकालये नाना विषयाणां पुस्तकानि सन्ति। छात्राः तानि अधीत्य विविध-विषयं ज्ञानम् अर्जयन्ति। विद्यालयस्य उत्तरस्यां दिशि एकः वाचनालयः अपि वर्तते। विद्यालये भवने सप्तति कक्षाः सन्ति। सर्वेषु कक्षेषु श्यामपटाः सुधालेखिन्यश्च उपस्थिताः सन्ति।

पञ्चशतोत्तर सहस्रछात्राः प्रतिवर्षम् अत्र विद्यलाभं कुर्वन्ति। अस्मिन् विद्यालये नवति अध्यापकाः पाठयन्ति। ते अध्यापकाः अति निपुणाः गुणिनश्च सन्ति। मम विद्यालये द्वारपालः मार्जकः जलपाययिता तथा च अन्ये बहवः कार्यकर्त्तारः सन्ति। ते स्व-स्व कार्ये विद्यालयस्य सेवां कुर्वन्ति। अस्माकं विद्यालयस्य प्रधानाचार्य अनुशासन प्रियः सन् कठोरः अपि, शिष्याणां सर्वदा हित चिन्तनेन स्नेहस्य मूर्तिरिव प्रतिभाति।

अस्मिन् विद्यालये हिन्दी भाषा, संस्कृत भाषा, आंगल भाषा, विज्ञानम्, गणितम्, अर्थशास्त्रम्, इतिहासम्, समाजशास्त्रम्, आदयः अनेके विषयाः पाठ्यन्ते। अस्य विद्यालयस्य परीक्षाफलं शत प्रतिशतं भवति। अत्र केवलं पाठ्य विषयाः एव न पाठ्यन्ते अपितु अन्तरे अन्तरे शारीरिकी शिक्षा, नैतिक शिक्षा अपि च प्रदीयते।

मम विद्यालयस्य छात्राः क्रीडायां, भाषणे, देशे सेवायाम् अपि उत्कृष्टाः सन्ति। एवं मम विद्यालयस्य ख्याति निकट वर्तिभ्य विद्यालयेभ्यः सर्वाधिकम् अस्ति।

(९) गौः

गौः अस्माकं देशस्य सर्वश्रेष्ठः पशुः अस्ति। गौः मनुष्याणां महान्तम् उपकारं करोति। इयं देवरूपा मातृतुल्या कल्याणकारिणी च अस्ति। गौः भारतस्य सर्वेषु प्रान्तेषु प्राप्यते। अस्याः द्वे श्रृंगे, पृष्ठे लम्बमानं पुच्छं, द्विविभक्ताः चत्वारः खुराः भवन्ति।अस्याः ग्रीवायाः अधोभागे गलकम्बलं भवति। गावः विविधवर्णाः भवन्ति।

गौः स्वयं घासं बुसं च खादति परं मानवेभ्यः अमृतोपमं सुमधुरं दुग्धं यच्छति। सर्वे मनुष्याः गवां दुग्धं पिबन्ति। गोदुग्धम् अतीव पवित्रं भवति। गवां दुग्धं सुपाच्यं हितकरं स्वास्थ्यकरं च भवति। अस्याः दुग्धेन नवनीतं, तक्रं, घृतं, दधि तथा अनेक विधानि मिष्ठान्नानि रचयामः। न केवलं दुग्धम् एव अपितु अस्याः मूत्रं मलश्चापि अति हितकरौ। वैद्यैः गौमूत्रम् औषधि रूपेण प्रयुज्यते। गोमूत्रेण उदर रोगाः नश्यन्ति। तस्य गोमयेन मानवाः गृहाणि उपलिप्यन्ते। गोमयेन भूमेः उर्वरा शक्ति वर्धते, इन्धनकार्यं च विधीयते। मृतायां गो चर्मणा उपानहादिकम् निर्मीयते। अस्याः अस्थिभ्यः खादं विधीयते।

गौः सुताः एव वृषभाः भवन्ति। वृषभा एव कृषि कर्मणि कृषकानां सहायतां कुर्वन्ति। ते क्षेत्रे हलान् कर्षन्ति, भारं वहन्ति, रथान् चालयन्ति। वृषभाः अपि हिन्दुभिः पूज्यन्ते, यत् एष शिवस्य वाहनम् अस्ति। एवं गौः अस्माकं अति उपकारं करोति। यथा माता स्वसुतं पालयति रक्षति च तथैव गौ अस्मान् पालयति रक्षति च। सा मातेव पूजनीया भवति। उक्तं च—

मातरः सर्वभूतानां गावः, सर्वसुख प्रदाः।

प्राचीन कालादेव भारतवर्षे गवां विशिष्टं महत्वम् अस्ति। दिलीपः गोसेवां कृत्वा पुत्रं लब्धवान्। श्रीकृष्णः स्वयं गाः अचारयत्। गोः चारणेन कृष्णः 'गोपाल': कथ्यते। यद्यपि भारत विधाने गोहत्या निषिद्धाः तथापि अद्यापि अस्माकं देशे गोहत्या भवति। गवां पालने पोषणे च वयं उचितं ध्यानं न यच्छामः इति खेदस्य विषयः। मदीया अभिलाषा अस्ति, यत्

गावो मे अग्रतः सन्तु, गावो मे सन्तु पृष्ठतः।
गावो मे सर्वतः सन्तु गवां मध्ये वसाम्यहम॥

(१०) दुर्गापूजा महोत्सवः

उत्सव बहुले भारते जनाः उत्सवैः यत्र मानसिक परितोषम् मनोरंजनम्, शान्तिम्, विश्रान्तिम् च प्राप्नुवन्ति तत्रैव आध्यात्मिकं लाभं चापि लभन्ते। एते उत्सवाः महोत्सवाश्च बहुविधाः भवन्ति। केचन सामाजिक उत्सवाः, केचन राजनैतिक उत्सवाः केचन धार्मिक महोत्सवाः अस्माकम् दृष्टिपथम् आयान्ति।

एतेषु महोत्सवेषु दुर्गापूजा महोत्सवः अभीष्ट फलदायकः, दैविक, दैहिक, भौतिक ताप हारकः, शत्रु विनाशकः, समृद्धिदायकः विख्यातः अस्ति। भक्ताः नवादिनानि वृतम् धारयन्ति साधनाम् च साधयन्ति। महामायां जगदम्बिकाम् प्रति एषाम् परम गहनो विश्वासः यत्—

कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।

अखिले भरते भक्त जनाः श्रद्धा-भक्ति-भावेन नव चण्डिकाः पूजयन्ति। दुर्गा पूजा महोत्सवः शरद् ऋतौ भवति आश्विन मासस्य शुक्ले पक्षे प्रतिपदायाम् अस्य महोत्सवस्य शुभारम्भो भवति। कथितम् महामायया स्वेन श्रीमुखेन—

शरत्काले महापूजा, क्रियते या च वार्षिकी।
तस्याम् ममैतन्महात्म्यं श्रुत्वा भक्ति समन्वितः ॥

नवदुर्गायाम् प्रतिदिनम् साधकाः भगवती मूर्ति सम्मुखे आसन बद्धो भूत्वा तद्गतेन मनसा स्व साधनाम् कुर्वन्ति, धूप-दीपम्, दर्शयन्ति, सपुष्पम् नारिकेलं समर्पयन्ति, सादरम् नैवेद्यम् निवेदयन्ति, मुख शुद्ध्यर्थम् एला लवंग कर्पूरयुतं ताम्बूलम् अर्पयन्ति। प्रतिदिनम् दुर्गासप्तशत्याः पाठम् कुर्वन्ति कारयन्ति च। गीत-वादनादिभिः नृत्यन्ति, गायन्ति। सर्वाबाधा विमुक्त्यर्थम् धन धान्य प्राप्तेर्थम् रिपूणाम् क्षयार्थम्, उपसर्गाणाम् शमनार्थम्, उग्रासु ग्रह पीडासु शान्त्यर्थम् कर बद्धाः भक्ताः जगदम्बिकाम् स्तुवन्ति। प्रार्थयन्ति च

स्तुता सुरैः पूर्वमभीष्ट संश्रयात्,
तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी,
शुभानि भद्राणि अभिहन्तु चापदः।

बंगाल प्रान्ते असौ महोत्सवः सर्वेषु महोत्सवेषु प्रधान महोत्सवः भवति। बंग प्रान्तीयानां गृहे-गृहे दुर्गायाः मूर्तिस्थापनं भवति। ते सर्वे वृतोपवासादिभिः स्वकीयां इष्टदेवीम् भगवतीम् महाकालिकाम् अर्चयन्ति। नवम्याम् दशम्याम् वा देव्याः मण्मयीं मूर्तिम् शंखध्वनिभिः घण्टा रवैः मृदंग वादनैः आपूर्यमाणे मंगलमये वातावरणे जले विसर्जयन्ति। यस्मिन् दिवसे मूर्ति विसर्जनम् भवति तस्मिन् दिवसे भक्ति भावाप्लाविताः जनाः सपरिवारम् जलाशये गच्छन्ति प्रणमन्ति च महामायाम्।

अनेन महोत्सवेन यत्र पारमार्थिकोः लाभः भवति तत्रैव जनानाम् मनोरंजनम् अपि भवति। अस्मिन् पर्वे शिल्पिनः अनेकानि बहुविधानि विचित्राणि वस्तूनि समुपकल्पयन्ति। अतः अयम् शारदीय महोत्सवः सर्वथा अनुकरणीयः दर्शनीयः प्रशंसनीयश्च।

(११) विजयादशमी

भारतवर्षे बहवः महोत्सवाः भवन्ति। महोत्सवैः जनतासु उल्लासः उत्साहः च उत्पद्यते। तेषु उत्सवेषु चत्वारः उत्सवाः प्रमुखाः सन्ति। तद्यथा-विजयादशमी, रक्षाबन्धनं, दीपमालिका, होलिकोत्सवश्च। एतेषु अपि विजयादशम्याः प्रमुखं स्थानं वर्तते। विजयादशमी आश्विनस्य शुक्ले पक्षे दशम्याम् तिथौ भवति।

अनुश्रूयते यत् श्रीरामः लंकेश्वरं रावणं हत्वा स्वां धर्मपत्नीं प्राप्तवान्। अस्य उपलक्ष्ये अयं महोत्सवः भवति। यदा रामः विजयम् अलभत् तदा आश्विन-मासस्य शुक्लपक्षस्य दशमी आसीत्। अतः अयं दिवसः 'विजयदशमी' इति कथ्यते। श्री रामस्य विजयमाश्रित्यैव अयम् उत्सवः देशस्य प्रत्येक नगरे ग्रामे च आयोजितं भवति। अस्मिन् दिने रावणस्य, तस्य भ्रातुः कुम्भकर्णस्य, तस्य पुत्रस्य मेघनादस्य च प्रतिमाः ज्वालयन्ति। मानवाः एतद् सर्वं विलोक्य परमं प्रसीदन्ति। अयं उत्सवः संदिशति यत् रामादिवत् प्रवर्तितव्यं, न रावणादिवत्। अयं उत्सवः अधर्मे धर्मस्य, पापे पुण्यस्य, असत्ये सत्यस्य च विजयस्य प्रतीकः अस्ति।

अस्मिन् दिने शस्त्रपूजनम् अपि भवति। अस्मिन् दिने एव भगवतो बुद्धस्य जन्मः अपि अभवत्। सर्वत्र हर्षमयं वातावरणं भवति। मानवाः नवानि वस्त्राणि परिधाय आमोदं मानयन्ति। अस्मिन् दिने सूर्योदयात् पूर्वमेव नीलकण्ठ पक्षिदर्शनं शुभशकुनम् मन्यन्ते। जनाः तस्य दर्शनार्थम् तम् अन्वेष्टुम् वनानि गच्छन्ति। स्थाने-स्थाने विजयामेलपकाः अपि भवन्ति। उत्तर भारते सर्वत्र रामलीलायाः प्रदर्शनं भवति। स्त्रियः बालाश्च तेषु आनन्दम् अनुभवन्ति। मित्राणि परस्परं उपहारान् प्रेषयन्ति। अयं उत्सवः बङ्गप्रदेशस्य प्रमुखः उत्सवः। अस्याम् तिथौ बंगप्रान्ते दुर्गायाः पूजा भवति। अस्मिन्नेव दिवसे भगवत्या महाकाल्या असुराणाम् विनाशः कृतः।

(१२) रक्षाबन्धनम्

अस्मिन् संसारे दुःखानाम् आधिक्यं वर्तते। सर्वे जनाः सुखम् इच्छन्ति। दुःखितानां दुःखहरणे पर्वानाम् प्रमुखं स्थानं वर्तते। विश्वस्य सर्वेषु राष्ट्रेषु महोत्सवाः भवन्ति। भारतवर्षे अपि बहवः महोत्सवाः जायन्ते। यैः समये-समये जनाः जागृतिं नवोल्लासं च लभन्ते। तेषु चत्वारः उत्सवाः प्रमुखाः सन्ति। तद्यथा-रक्षाबन्धनम्, विजयादशमी, दीपमालिका होलिकोत्सवश्च। तेषु अपि रक्षाबन्धनम् मुख्यतमं वर्तते। अयम् उत्सवः श्रावणमासस्य पूर्णिमायां भवति। अयम् समयः अति मनोहारी भवति, शीतलः पवनः प्रवहति, सर्वत्र हरीतिमा एव दृश्यते।

अनेन पर्वणा एका ऐतिहासिकी कथा अपि सम्बद्धा अस्ति। एकदा इन्द्राणी स्वपत्युः इन्द्रस्य हस्ते दानवेभ्यः रक्षणार्थम् रक्षाबन्धनम् अकरोत्। इन्द्रः तेन एव रक्षा सूत्रेण दैत्यं बलिं बबन्ध। यथा च रक्षाबन्धन समये पठ्मानेन अनेन श्लोकेन् ज्ञायते—

येन राजा बलिर्बद्धो, दानवेन्द्रो महाबलः।

तेन त्वां प्रतिबध्नामि, रक्षे मा चल मा चल॥

तदा प्रभृति अयं उत्सवः भवति। अनुश्रूयते यत्-राज्ञी कर्णवती मुगलराजं हुमायूं नृपतेः पार्श्वे स्वरक्षार्थं रक्षासूत्रं प्रेषितवती। हुमायूँः अपि ताम् भगिनीं मत्वा तस्याः रक्षां अकरोत्। प्राचीन काले ऋषयः ब्राह्मणाश्च अस्मिन पर्वे यजमानानाम् हस्तेषु रक्षासूत्रम् अबधन्त। यजमानाश्च तेषाम् जीवन निर्वाहार्थम् पर्याप्तम् धनम् यच्छन्ति स्म। लोके अयम् उत्सवः 'राखी' इति नाम्ना उच्यते। अस्मिन् दिने भगिन्यः स्वभ्रातृणां हस्तेषु रक्षाबन्धनं कुर्वन्ति, इच्छन्ति च यत् इदं रक्षासूत्रं तान् विपद्भ्यः रक्षेत्। भ्रातरः अपि तासां रक्षार्थं प्रतिज्ञां कुर्वन्ति। केन्द्रीय शासनेन अयं दिवसः संस्कृत दिवस रूपेण स्वीकृतः। अतएव अस्मिन् दिने भारतवर्षे स्थाने-स्थाने संस्कृतोत्सवाः अपि भवन्ति।

(१३) दीपावलि

'शत्रवो वयम् अन्धकारस्य' इति विचार्य एव पुरा भारतीयैः गहनतमान्धकारपूर्णायां कार्तिकामावस्यायां दीपानां या अवलिः प्रकाशिता कृता आसीत् सैव अवलिः 'दीपावलिः' इति प्रसिद्धम्। अयम् उत्सवः कार्तिक-मासस्य अमावस्यायां भवति। एषः समयः अति मनोहरः भवति। शरद् ऋतौ आकाशं निर्मलं, पंकरहिताः मार्गाः स्वच्छ-जल-पूरिताः तडागाश्च भवन्ति।

अनुश्रूयते यत् यदा रामचन्द्रः रावणं हत्वा सीतया सह अयोध्यायां प्रत्यागच्छत् तदा जनाः प्रसन्नतायां रात्रौ दीपानाम् अवलिः प्राज्वालयन्। केचित् कथयन्ति यत् अस्मिन् दिवसे लक्ष्मीदेव्याः जन्म अभवत्। सा अस्मिन् दिने सर्वत्र पर्यटति। यं गृहं स्वच्छतमं पश्यति सा तस्मिन् एव प्रविशति। अतः जनाः स्वगृहाणाम् भवनानां च स्वच्छतां कुर्वन्ति, गृहाणि गोमयेन लिम्पन्ति, अलंकुर्वन्ति च। लक्ष्मीदेवीं पूजयन्ति। सर्वैः मानवाः नवानि वस्त्राणि धारयन्ति। मित्राणि परस्परम् उपहारान् प्रेषयन्ति, समृद्ध्यर्थं च शुभं कामयन्ते। दीपावल्याः पूर्वम् त्रयोदश्याम् धन्वतरि जयन्तिः भवति। अयम् दिवसः 'धन तेरस' इत्यपि कथ्यते लोकैः। अस्मिन् दिने जनाः नूतनानि पात्राणि क्रयन्ति। चतुर्दश्याम् यमदीपदानम् भवति। अमावस्यायाम् दीपावल्याः उत्सवः भवति।

मध्यान्हे स्व-स्व इष्ट देवताम् पूजयित्वा, गृहे निर्मितानि नाना प्रकाराणि व्यंजनानि भुक्त्वा भृशम् मोदयन्ति। सांय काले दीपान् ज्वालयन्ति। आबाल वृद्धाः सुसज्जतानि आपणानि दृष्टुम् मिष्ठान्नम् क्रेतुम् च गच्छन्ति। रात्रौ श्रीगणेशेन सह लक्ष्म्याः पूजनं क्रियते। धर्म परायणाः धनिकाः मुक्तहस्तेन निर्धनेभ्यः धनं वितरन्ति। इदं सर्वं तु रोचते स्तुत्यं च। अस्मिन् उत्सवे मद्यपानं, द्यूतक्रीडा, स्फोटक-पदार्थेषु धनस्य अपव्ययः इति सर्वं दीपमालायाः अवमानः इव प्रतीयते। यदि दीपमालया बुद्धौ ईदृशः अन्धकारः जायेत् तर्हि गणेशपूजन पुरस्सरेण लक्ष्मीपूजनेन को लाभः ? अतः दीपावलिः सर्वेभ्यः प्रकाशकारिणी भवेद् इति हेतोः इयमेव प्रार्थना कर्त्तव्या—

'तमसो मा ज्योतिर्गमय।'

(१४) होलिकोत्सवः

संसारस्य सर्वेषु देशेषु महोत्सवाः भवन्ति। भारतवर्षे तु उत्सवानाम् आधिक्यम् अस्ति। अत्र प्रतिमासं कोऽपि न कोऽपि उत्सवः भवति। एषु उत्सवेषु होलिकोत्सवः श्रेष्ठः अस्ति। सुरभित वायुमण्डले वसन्ते ऋतौ अयं उत्सवः भवति। अस्मिन् ऋतौ न अतिघर्मः न च अतिशीतं भवति। वृक्षेषु नवानि पल्लवनि उद्भवन्ति। अयं उत्सवः फाल्गुनमासस्य पूर्णिमायां तिथौ भवति। चतुर्दश्याः रात्रौ होलिकायाः दहनं भवति। पूर्णिमायां तु बहुविधं रंगप्रक्षेपणं भवति। जनाः नानाविधं गुलालं, सुरभितं पुष्पपरागं च मुखेषु मर्दयन्ति। ते परस्परम् आलिंगन्ति, लघवः वृद्धान् नमन्ति, आशीर्वादं च गृह्णन्ति। सर्वत्र सर्वेजनाः प्रसन्नाः दृश्यन्ते। परस्परं द्वेषं विस्मृत्य सर्वे परस्परं कण्ठे मिलन्ति। अस्मिन् दिवसे ये जनाः पक्वान् रंगान् मलादिकं वा क्षिपन्ति, ते निन्दनीयाः।

होलिका विषये एका कथा प्रचलिता अस्ति यत् पुरा महादैत्यः हिरण्यकशिपुः आसीत्। तस्य पुत्रः प्रह्लादः विष्णु भक्तः आसीत। वार्यमाणोऽपि प्रह्लादः विष्णुभक्ति न अत्यजत्। हिरण्यकशिपोः सर्वे प्रयत्नाः निष्फलाः जाताः। तस्य होलिका नाम्नी एका भगिनी आसीत्। केनचित् तस्यै वरं दत्तं यत् सा अग्निना न धँक्ष्यति। सा होलिका प्रह्लादम् अङ्के निधाय चिताम् आरोहत्। येन प्रह्लादः ज्वलतु, परं परमेश्वरस्य कृपया होलिका दग्धा, प्रह्लादः च अक्षत शरीरः बहिः आगच्छत्। तस्मात् कालात् सम्पूर्णे भारते होलिकोत्सवः प्रचलितः। केचित् कथयन्ति यत भारतीयाः नवधान्यान् अग्निदेवताम् समर्प्य एव भक्षितुम् प्रारभन्ते।अतः यवचणकादीन् ज्वलदग्नौ समर्पयन्ति।

अयम् उत्सवः ऋतुपरिवर्तनम् अपि सूचयति। प्राचीन काले अस्माकं पूर्वजाः होलकैः अर्धपक्वान्नैः यज्ञं कृत्वा होलिकोत्सवं अकुर्वन्। अधुना तु प्रतिग्रामम् प्रतिनगरम् स्थाने-स्थाने च संचितम् काष्ठ समूहम् अग्निना संदीप्यन्ते। अस्मिन् वसन्ततौं श्रीकृष्णोऽपि वशीं वादयन् गौपैः गोपिकाभिश्च सह वासन्ती जलकणैः होलिकाम् अखेलत्। इदम् अपि उद्दिश्य सर्वे भारतीयाः भेदभावं विहाय कण्ठेन संमिल्य विभिन्न वर्णकम् जलम् परस्परे क्षिप्त्वा होलिकोत्सवं मानयन्ति, मूर्खाः परस्परम् पंकम् क्षिपन्ति, मदिरा पानेन अर्धसंज्ञाशून्याः भूत्वा इतस्ततः पतन्ति च।

(१५) वसन्तोत्सवः

ऋतु दृष्ट्या अस्मद्देशः अन्येभ्यः सर्वदेशेभ्यः विलक्षणः सौभाग्यशाली च वर्तते। अत्र वसन्तः, ग्रीष्मः, वर्षा, शरद्, हेमन्तः, शिशिरः च इत्यादयो षड् ऋतवः भवन्ति। तेषु वसन्तः 'ऋतुराजः' उच्यते। अस्मिन् ऋतौ शीतस्य न्यूनता, उष्णतायाः च पूर्णतया अभावो भवति। प्रातः सायं च सुगन्धः सुखप्रदः वायु वहति। अयं ऋतुः सर्वेषां आनन्ददायिनी अस्ति। बाल्मीकि रामायणे वसन्तस्य अपूर्वाम् शोभाम् वर्णयन् रामः लक्ष्मणम् प्रति आह—

सुखानिलोऽयं सौमित्रे, कालः प्रचुर मन्मथः।
गन्धवान् सुरभिर्मासो जात पुष्प फल द्रुमाः॥

वसन्त-शोभा प्रभावितः रामः अग्रेऽपि वर्णयतिः—

पश्य रुपाणि सौमित्रे वनानाम् पुष्प शालिनाम्
सृजताम् पुष्प वर्षाणि वर्षे तोयमुचामिव।

वसन्ते वृक्षेषु नवानि पल्लवानि उद्‌भवन्ति। उद्यानानि कुसुमैः आच्छादिताः भवन्ति। क्षेत्रेषु पीत-वर्णानि सर्षप पुष्पाणि शोभन्ते। आम्रस्य वृक्षेषु मञ्जर्यः आगच्छन्ति वसन्ते कोकिल कूजनम् तु विशेषतः आनन्दं जनयति। अतएव कालिदासेन उच्यते—

द्रुमाः सपुष्पाः, सलिलं सपद्मं
स्त्रियः सकामाः, पवनः सुगन्धिः।
सुखाः प्रदोषाः दिवसश्च रात्रिः
सर्वं प्रियं चारुतरे वसन्ते॥

गीतायां श्रीकृष्णेन "ऋतूनां कुसुमाकरः" उक्त्वा वसन्तस्य महत्तां प्रतिपादिता। बसन्त ऋतौ माघमासे शुक्ल पक्षस्य पञ्चम्यां तिथौ वसन्त पञ्चमी उत्सवः भवति। अस्मिन् उत्सवे छात्राः प्रभाते सरस्वती पूजनं कुर्वन्ति। जनाः पीतानि वस्त्राणि धारयन्ति। नरः नार्यश्च सर्वत्र गीतकानि गायन्ति नृत्यन्ति च। स्वास्थ्य दृष्ट्या अपि वसन्तः विशेषतः लाभप्रदो भवति।

(१६) वर्षा-वर्णनम्

अस्माकं देशे एकस्मिन वर्षे षड् ऋतवः भवन्ति। तेषां नामानि-बसन्तः, ग्रीष्मः, वर्षा, शरद्, हेमन्तः, शिशिरश्च। एवं ऋतुचक्रे ग्रीष्मोपरान्ते वर्षायाः क्रमः। वर्षा ऋतौ घर्मः अपसरति वर्षायाः वर्षणेन च सुखमनुभूयते। अस्मिन् ऋतौ मेघ गर्जनं श्रुत्वा मयूराः नृत्यन्ति। तेषां केका रवान् श्रुत्वा सर्वेजनाः प्रसन्नाः भवन्ति। सर्वत्र जलमेव दृश्यते। सरोवरेषु मण्डूकानां तारस्वरं श्रूयते। महर्षि बाल्मीकिना अपि रामायणे वर्षा प्रभावो वर्णितः

स्वनैः घनानां प्लवगाः प्रबुद्धाः विहाय निद्राम् चिर सन्निरुद्धाम्,
अनेक रूपाकृति वर्णनादाः, नवाम्बुधाराभिहतोः नदन्ति

वर्षायाम् वर्षा धारा प्रताडिताः अनेक रूप आकृतिवन्तः प्लवगाः (मेढ़क इति हिन्द्याम्) चिरनिद्राम त्यक्त्वा मेघनाम् गर्जन स्वरैः जाग्रताः जाताः।

बाल्मीकिना अग्रेऽपि वर्णितम्। का कथा प्लवगानाम् केवलं, मृगेन्द्राः अपि वनेषु अति भयावहाः, हस्तिनः मत्ताः गवेन्द्रा प्रसन्नोः नगेन्द्राः अभिरामाः जाताः। अतः वर्णितम् बाल्मीकेन :—

मत्ताः गजेन्द्राः मुदिताः गवेन्द्राः वनेषु विक्रान्ततराः मृगेन्द्राः।
रम्याः नगेन्द्राः निभृताः नरेन्द्राः प्रक्रीड़ितो वारिधरैः सुरेन्द्रः॥

अयं ऋतुः अतीव शोभनः सर्व प्रियश्च भवति। वर्षारम्भ काले एव बालाः युवतयः वृद्धाः सर्वे पशवः पक्षिणश्च प्रसन्नाः भवन्ति। क्षेत्रेषु सर्वत्र हरीतिमा शोभते। जलपूरितानां सरोवरेषु बकाः, सारसाः, राजहंसाः, अन्ये पक्षिणः च आगत्य जलक्रीड़ां कुर्वन्ति। अस्मिन् ऋतौ कन्याः दोलासु दोलायमानाः मोदन्ते।

अतिवृष्टिः अपि हानिकरा भवति। अतिवृष्ट्या उप्ता कृषिः विगलिता भूत्वा विनश्यति। बहुधा जलप्लावेन सहस्रशः ग्रामाः जले निमग्नाः भवन्ति। एवं जन-धन-पशूनां महान् नाशो भवति। वर्षया भूमिः कृषियोग्या भवति। वर्षा कृषिं महत् उपकरोति। वर्षा ऋतुः भारतवासिभ्यः अतीव उपयोगी ऋतुः वर्तते।

(१७) रेलयात्रा

अति विचित्राः वैज्ञानिकाः आविष्काराः मानवम् आश्चर्यान्वितं कुर्वन्ति। ते मानवानां कल्याणं कुर्वन्ति, मनांसिच रञ्जयन्ति। तेषु आविष्कारेषु वाष्पयानस्य आविष्कारोऽपि अतीव विचित्रः अस्ति।

भारतवर्षे सर्वप्रथमं १८५३ तमे ख्रीष्टाब्दे वाष्पयानं प्रचलितम अभवत्। अद्य तु वाष्पयानानि सर्वत्रैव इतस्ततः धावन्तः दृश्यन्ते अस्माकं शरीरस्य, मनसः, मस्तिष्कस्य च श्रान्तिः यात्रया दूरी भवति। अस्माकं देशे यातायातस्य अनेकानि साधनानि सन्ति। यथा-रेलयानम्, वायुयानम्, जलयानम्, मोटरयानम् इति। तेषु रेलयात्रायाः विशिष्टं महत्त्वम् अस्ति।

अस्मिन् वर्षे अस्माकं विद्यालये ग्रीष्मावकाशाः अभवन्। मया वाष्पयानेन देहरादून नगरं गन्तुं विचारितम्। तदा अहं यात्रायै आवश्यक-सामग्रीं नीत्वा वाष्पयानस्थिति स्थानं (स्टेशन) गतवान्। अहम् अधिकारपत्रं (टिकिट) गृहीत्वा प्रतीक्षालये अगच्छम्। तत्र कश्चित् अभक्षयत्, कश्चित् जलम् अपिबत् कश्चित् च समाचार पत्रम् अपठत्। अचिरादेव वाष्पयानम् आगतम्।

अहं याने सुखेन अतिष्ठम्। रात्रौ दशवादन समये वाष्पशकटी मेरठ नगरतः प्रचलिता। हृदये समुपजातो नवीनोत्साहस्य प्रादुर्भावः। हिमालयस्य अधित्यकायाम स्थितम् देहरादूनम् यदा अहम् प्राप्तम् तदा मार्गे मनोहारि दृश्यं पश्यन् विमुग्धहृदयः अहम् आत्मानम् अपि विस्मृतवान्। मार्गे अनेकानि वाष्पशकटी विश्रामस्थलानि समायातानि। प्रातः पञ्चवादन समये अहं देहरादून नगरं प्राप्तः।

ततः यात्रा सामिग्रीम् एकस्य मित्रस्य गृहे स्थापयित्वा तेनैव मित्रेण सह देहरादून स्थितम् वन महाविद्यालयम्, सेना प्रशिक्षण अकादमीम्, दून स्कूलम् अवलोकयितुम् प्रस्थितः। अन्येद्युः देहरादूनात् नातिदूरे स्थिताम् सहस्त्रधाराम् दृष्टुं तस्याम् स्नातुम् च गतः। तस्याः सहस्त्रधारायाः कूले आबाल वृद्धाः युवतयश्च सञ्चरन्तः, तिष्ठन्तः वार्त्तालापं कुर्वन्तः अवलोक्यन्ते स्म। स्नानार्थिनः स्नानम् कुर्वन्तः दृष्टिपथम् आयाताः। पर्वतानाम् साम्राज्ञीं मसूरीम् दृष्टुमपि अहं यातः। सा नगाधिराजस्य क्रोडे स्थिता इव प्रतीयते।

(१८) विद्यार्थी जीवनम्

यस्मात् समयादारभ्य यावत् समय पर्यन्तं विद्याध्ययनं भवति स सम्पूर्णं समयमेव 'विद्यार्थीजीवनम्' इति कथ्यते। महर्षिभिः आचार्यैः मानवस्य सम्पूर्ण जीवनम् चतुर्भागेषु विभक्तम्। तेषु प्रथमः भागः विद्याध्ययनस्य वर्तते। अयं कालः एव जीवनस्य स्वर्णकालः अस्ति। अस्मिन् काले एव मानवशरीरस्य बुद्धेश्च विकासो भवति।

विद्यार्थीजीवने बालस्य कोमलायां बुद्धौ ये शोभनाः अशोभनाः वा संस्काराः अंकिताः भवन्ति ते एव यौवने वार्धक्ये च फलिताः भवन्ति। अतः विद्यार्थिभ्यः उचितम् यत्-ते बाल्ये विद्याध्ययने उपेक्षां परित्यजन्तु। तस्मात् सर्वाणि सुखानि विहाय विद्याध्ययने संलग्नो भवेत्। न हि किमपि क्षणं विद्यायाः अध्ययनं बिना व्यर्थमेव यापयन्तु। अतएव सत्यमेव उक्तं केनापि विदुषा—

क्षणशः कणशश्चैव विद्यामर्थञ्च चिन्तयेत।
क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्॥

ये बालकाः छात्रजीवने सुखम् इच्छन्ति प्राप्नुवन्ति च ते युवावस्थायाम् वार्धक्ये च दुःखमेव अनुभवन्ति। परन्तु ये दुःखानि सहित्वा मनसा विद्याध्ययनं कुर्वन्ति, गुरोः आज्ञाम् पालयन्ति तेषां भावीजीवनम् सुखी जीवनम् भवति। अतः सुखेच्छुकाः बालाः विद्याध्ययने न कदापि अग्रगण्याः भवन्ति। सुष्ठु उक्तम् केनापि विद्वरेण्येन—

सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।
सुखार्थी चेत् त्यजेत् विद्यां विद्यार्थी चेत् त्यजेत् सुखम्।

विद्यार्थिनाम् कृते पंच लक्षणानि उक्तानिः—
काक चेष्टा बकोध्यानं श्वान् निद्रा तथैव च।
अल्पाहारी गृहत्यागी विद्यार्थी-पञ्चलक्षणम्॥

अन्य गुणापेक्षया विद्यार्थीजीवने ब्रह्मचर्यस्य महत्त्वं सर्वाधिकं वर्तते। ब्रह्माम्चर्येण एव शरीरः स्वस्थः भवति। स्वस्थे शरीरे एव स्वस्थं मस्तिष्कं भवति। स्वस्थाः छात्राः एव ज्ञानं लब्धुं समर्थाः भवन्ति। ब्रह्मचर्येण बिना आधुनिकाः

छात्राः जीवन्तः अपि मृताः एव, चक्षुष्मन्तः अपि चक्षुर्विहीनाः एव, बलहीनाः कान्तिहीनाः पीतवर्णाः एव दृश्यन्ते।

प्राचीन काले कृष्णः आरुणिः एकलव्यः आदयः अनेके महापुरुषाः स्वीयां महत्तां परित्यज्य विद्याध्ययन काले महद्भिः अपि कष्टानि सोढानि। ये छात्राः विद्यायाः अर्जन-काले दत्तचित्ता भूत्वा कष्टानि सोढ्वा महता परिश्रमेण विद्याध्ययनं कुर्वन्ति ते विद्वांसः भूत्वा सर्वत्र सम्मानं प्राप्नुवन्ति, धनम् अर्जन्ति, संसारे च सर्वविधेषु कार्येषु साफल्यं लभन्ते। उक्तम् चः—

"स्वेदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते"

विद्या प्राप्त्यर्थं गुरु भक्तेः आवश्यकता वर्तते। गुरु भक्त्या बिना विद्या प्राप्तिः असम्भवा एव। अतएव उच्यतेः—

गुरु शश्रूषया विद्या पुष्कलेन धनेन वा।
अथवा विद्यया विद्या चतुर्थान्नोपलभ्यते॥

ये गुरु भक्ताः न भवन्ति तेषां जीवन-साफल्यम् संदिग्धमेव। तेषां न यशः वर्धते न विद्या फलवती भवति। अतः विद्यार्थी जीवनस्य सफलतार्थ यत्र परिश्रमस्य, अनुशासनस्य महत्त्वम् अस्ति तत्र गुरुशुश्रूषाऽपि न्यूना न।

(१९) हिमालयो नाम नगाधिराजः

अयं पर्वतः हिमस्य आलयः (स्थानम्) अस्ति अतएव 'हिमालयः' कथ्यते। अस्य अत्युच्चानि शिखराणि विश्वस्य सर्वानपि पर्वतान् जयन्ति अतः अयं नगः नगाधिराजः इति कथ्यते। अयं पर्वतराजः भारतवर्षस्य उत्तरस्यां दिशि शोभते। हिमालयः भारतस्य प्रहरी इव शत्रुभ्यः सततं रक्षति। हिमालयात् भारतदेशस्य समृद्धिः भवति। मेघाः हिमालयस्य उच्चैः शिखरैः संघट्टयन्तः परावर्तन्ते, अस्माकं देशस्य भूमौ च वर्षन्ति। एवम् अयं पर्वतराजः भारतं महद् उपकरोति।

हिमालयस्य गुहासु योगिनः, तपस्विनः च तपस्यन्तः शान्तिं मुक्तिं च प्राप्नुवन्ति।अस्य उच्चतमानि शिखराणि सदैव हिममण्डितानि तिष्ठन्ति। अस्मात् पर्वतात् बह्वः नद्यः निस्सरन्ति यथा—गंगा, यमुना, ब्रहमपुत्रं, सिन्धु, विपाशाः आदयः। इमाः नद्यः अस्माकं देशस्य विशालं भूभागं सिञ्चन्ति शस्य श्यामलम् कुर्वन्ति च। अस्य हिमालयस्य सर्वोन्नतं शिखरं "एवरेस्ट" इति अभिधीयते। अस्य हिमालयस्य अधित्यकासु बद्रीनाथ-केदारनाथ प्रभृतीनि अस्माकं प्रसिद्धानि तीर्थस्थानानि सन्ति। अत्र अनेकानि महावनानि सन्ति यत्र बहु विधाः वनस्पतयः औषधयः उपलभ्यन्ते। अस्य उपत्यकायां स्थितः कश्मीरः ततश्च पूर्वस्याम् दिशि स्थिता कुल्लू-घाटी स्वकीयैः सौन्दर्यैः केषाम् मनः न हरति।

अस्यैव नगाधिराजस्य कन्दरासु तपस्याम् कुर्वन्तः अनेके महात्मानः परां सिद्धिम् प्राप्य मोक्षम् प्राप्तवन्तः। अस्यैव पर्वतस्य कैलाश शिखरे भगवतः शिवस्य स्थानम् अस्ति।

अतः अस्माकम् उपकारकः, रक्षकः, पालकः, पोषकः, वर्धकः, अयम् पर्वतराजः अस्माभिः सर्वदा रक्षणीयः।

(२०) भारतवर्षम्

अस्माकं देशम् भारतवर्षम् संसारस्य सर्वेषु देशेषु सर्वश्रेष्ठम्। अस्य देशस्य प्राचीनं नाम 'आर्यावर्त:'. अभवत्। पुरा अत्र दुष्यन्तो नम राजा आसीत्। तस्य पुत्रः भरतः आसीत्। तस्य नाम्ना एव अस्य देशस्य नाम भारतवर्षं जातम्। अस्य देशस्य उत्तरस्यां दिशि पर्वतराजः हिमालयो अस्ति। यः प्रहरी इव भारतं रक्षति। भारतस्य दक्षिणस्यां पूर्वस्यां च दिशि समुद्रः अस्य चरणौ प्रक्षालयति। अस्य एव अन्नेन, जलेन, वायुना वयम् पालिताः पोषिताः भवामः। अस्य महिमा वर्णयितुम् न शक्यते।

पुरा भारतवर्षः 'विश्व गुरुः' आसीत् यदा सर्वस्मिन् जगति अविद्यायाः प्रसारः आसीत् तदा अत्र महर्षयः वेदानाम् गानम् कुर्वन्तिस्म। पृथिव्यां मानवाः चारित्रिकीम् शिक्षां भारतात् एव ग्रहीतवन्तः। यथा च नीति शास्त्र कारेण मनुना कथितम्:-

एतद्देश प्रसूतस्य सकाशात् अग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

भारतमेव सर्वस्य ज्ञान विज्ञानस्य आदि स्रोतम् वर्तते। इयम् सा भूमिः अस्ति यत्र बहवः महर्षयः मुनयः महराजानश्च अभवन्। ये स्वबुद्धिबलेन स्वबाहुबलेन च विश्वस्य विजयम् अकुर्वन्। अस्मिन् एव देशे अनेके विद्वांसः, कवयः, दार्शनिकाः च समभूवन्। रामः, कृष्णः, बुद्धः, विवेकानन्दः, पाणिनी, बाल्मीकिः, कालिदासादयः महापुरुषाः अत्रैव समभूवन्। येषां नाम न केवलम् भारतवर्षे, अपि तु समस्ते जगति प्रसिद्धम् अस्ति।

भारतवर्षः कृषिप्रधानः देशः वर्तते। अत्र सर्वाणि शस्यानि समुद्भवन्ति। भारतस्य समृद्धिम् आकलय्यैव विदेशीयैः भारतं 'सुवर्ण पक्षी' इति प्रशस्यते स्म। अस्य प्राकृतिक दृश्यमपि लोभनीयम् वर्तते।

अस्माकं देशे विविधाः जातयः, धर्माः, भाषाश्च सन्ति किन्तु सर्वे एकता सूत्रग्रंथिताः स्वदेशस्य अनुशासनं पालयन्ति। ते च सर्वदा स्वदेशस्य रक्षायै तत्पराः दृश्यन्ते। विष्णु पुराणे अपि अस्य महत्ता वर्णिता—

गायन्ति देवाःकिल गीतिकानि, धन्यास्तु ये भारतभूमि भागे।
स्वर्गापवर्गास्पद हेतु भूते, भवन्ति भूयो पुरुषाः सुरत्वात्॥

(२१) "गीता सुगीता कर्त्तव्या"
अथवा
मम प्रियं पुस्तकम्

अस्मिन् संसारे पुस्तकानि एव मनुष्यं शिक्षितं यशस्विनं उन्नतं च कुर्वन्ति। अतः जीवने पुस्तकानाम् अतीव महत्त्वं वर्तते। मया अनेकानि पुस्तकानि पठितानि सन्ति। सर्वाणि एव सुपुस्तकानि मम मनो हरन्ति। परं तेषु सर्वेषु श्रीमद्‌भगवद्गीता मम प्रियं पुस्तकम्।

गीता महाभारतस्य एकः भागः अस्ति। यदा युद्धसमये अर्जुनः मोहग्रस्तः युद्धविरतः च अभवत् तदा श्री कृष्णः तं यद् उपदिशत् तस्य भावस्य संकलनम् एव गीता शास्त्रे विद्यते। उक्तं हि-

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।

पार्थो वत्सः सुधी र्भोक्ता दुग्धं गीतामृतं महत्॥

न केवलं भारतीये साहित्ये अपितु विश्व साहित्ये अपि गीता सादृशी अन्या कृतिः नास्ति। गीतायाः महत्त्वं कोऽपि वर्णयितुं न शक्नोति। एतस्मिन् ग्रन्थे वे वेदनां सारः विद्यते। गीतायाः विषयः अति गम्भीरः अस्ति। अस्य ग्रन्थस्य भाषा सरला, सुबोधा, मनोहरा च अस्ति। गीतायाः अपरं नाम 'कर्मयोग-शास्त्रम्' अस्ति। गीता अस्मान् सर्वेषु अपि लौकिक कर्मसु कौशलं शिक्षयति। अतएव इत्युच्यते विद्वत् जनैः-

गीता सुगीता कर्त्तव्या किमन्यैः शास्त्र विस्तरैः।

या स्वयं पद्मनाभस्य मुखपद्माद्विनिर्गता॥

गीता उपदिशिति, यत् मरणम् वरम् परन्तु अपकीर्तिमान् भूत्वा जीवनम् न वरम् अतः मनुष्यैः सर्वकालेषु स्वकीर्तिः रक्षणीया-

"संभावितस्य चाकीर्ति र्मरणादतिरिच्यते"

गीता उपदिशिति यत् धर्मः न कदापि त्याज्यः-

"स्वधर्मे निधनं श्रेयः, परधर्मो भयावहः"

गीता उपदिशति यत् मनुष्यस्य पुनर्जन्म अपरिहार्यः-

"जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च"

गीता उपदिशति यत् आत्मा अजरः अमरश्च—

न जायते म्रियते वा कदाचित् नायम् भूत्वा, भविता वा न भूयः।"

एतैः उपदेशैः एव श्रीमद्‌भगवद्गीता मह्यम् अतीव रोचते।

२२. व्यायामः स्वास्थ्य साधनम्

इदम् तु सर्वविदितम् यत् स्वास्थेन विना जीवनस्य किमपि कार्यम् साफल्येन सम्पादयितुम न शक्यते। अस्वस्थो जनः पदे-पदे असफलताम् अनुभवति। स्वास्थ्यम् जीवनस्य अमूल्यं रत्नम् वर्तते। अस्य अमूल्यस्य रत्नस्य संरक्षणाय यथा समुचित भोजनादिकानि वस्तूनि आवश्यकानि सन्ति, तथैव व्यायामो ऽपि परमावश्यकः वर्तते।

वस्तुतः शारीरिक बलस्य सार्वकालिक महत्त्वम् अस्ति। तेन बिना जीविकोपार्जनात् आरभ्य राष्ट्र संरक्षण पर्यन्तम् किमपि कार्यम् विधातुं न शक्यते। यो हि अधिकम् परिश्रमम् कर्त्तुम शक्नोति स एव सफली भवति। अधिकश्च परिश्रमः शारीरिक बलेन एव कर्त्तुम् शक्यते। दुर्बलो हि पुरुषः शीघ्रम् एवं श्रान्तः भूत्वा स्वकार्यात् विरमति, संघर्षेषु व्यथितः भवति, फलतः पदे-पदे खिन्नः भवति। अतः स्वास्थ्य संरक्षणाय व्यायामस्य अत्यधिका उपयोगिता वर्तते। अतः कथ्यते:-

"व्यायामात् पुष्ट गात्राणि"

व्यायामस्य अनेके प्रकाराः सन्ति। यथा भ्रमणम्, कूर्दनम, जल सन्तरणम्, सूर्यनमस्कारः, शरीरस्य उत्थापन-स्थापन क्रिया, विभिन्नानि आसनानि, विभिन्नाश्च क्रीड़ाः इत्यादयः। आत्मरुचेः अनुसारेण को ऽपि व्यायाम प्रकारः अंगीकर्त्तुम् शक्यते।

व्यायामस्य विषये सर्वप्रथमम् अयम् नियमः पालनीयः यत् व्यायामः सर्वथा मुक्ते वाते वातावरणे च कर्त्तव्यः। द्वितीयच्च नियमः ध्येयः अस्ति यत प्रायः सर्वेषाम् अपि अंगानाम् व्यायामः जायेत् येन सर्वांगानाम् लाभो भवेत्। तृतीयः नियमः यत् व्यायामः नियमित रूपेण नियते समये कर्त्तव्यः। चतुर्थः नियमः यत् 'अति सर्वत्र वर्जयेत्' इति उक्ति विचार्य अतिशय व्यायाप्त् न कुर्यात्। श्रान्तेः अतिरेकेण हानेः सम्भावना भवति। एतेभ्यः व्यायामेभ्यः भ्रमणम् परमोपयुक्तम् अस्ति।

अतः व्यायाम सम्पादनेन स्वास्थ्यम् सुरक्षितम्, कार्येषु रुचिः मनः प्रसन्नम् च जायते। स्वास्थ्येन सर्वम् साध्यते, किन्तु स्वास्थ्यः व्यायामेनैव साध्यते। फलतः नियतरुपेण व्यायामः विधेयः।

२३. आदर्शः नागरिकः

कस्यापि राष्ट्रस्य सदस्यः तस्मात् राष्ट्रात् कतिचन अधिकारान् प्राप्नोति तथा च तस्य राष्ट्रस्य कानिचत् नियमानि पालयति। सः तस्य राष्ट्रस्य नागरिकः भवति। किन्तु सर्वेऽपि नागरिकाः आदर्श नागरिकाः न भवन्ति। आदर्शे नागरिके किञ्चित् अधिकम् अपेक्षितम् वर्तते।

आदर्शः नागरिकः स्वकीयम् उत्तरदायित्वं समीचीनतया जानाति, सः स्व अधिकाराणाम् प्रयोगम् स्व कर्त्तव्यानाम् च पालनम् सर्वदा सम्यग् रूपेण विदधाति। आदर्श नागरिके कतिचन गुणाः अपेक्षिताः भवन्ति। तस्य सर्वम् अपि कार्यं राष्ट्रहिताय एव भवेत् राष्ट्रस्य हिताहितं तस्य स्वकीयम् हिताहितम् स्यात्। राष्ट्रीयतायाः भावना तस्मिन् मूर्त्तरूपेण सर्वदा जागृता तिष्ठेत्।

आदर्शः नागरिकः शरीरेण स्वस्थः भवेत्, अस्वस्थोजनः न स्व कल्याणं न परकल्याणं कर्त्तुम् समर्थः भवति। सः सुशिक्षितः अपि स्यात्, शिक्षायाः प्रधानम् उद्देश्यं इदमेव यत् आदर्शः नागरिकः स्वस्य, समाजस्य, राष्ट्रस्य, विश्वस्य च कल्याणं यथा शक्यम् साधयेत्। आदर्श नागरिकः ज्ञान शक्तिसम्पन्नः, विवेक युक्तः, विचारवान्, चरित्रवान्, उदारहृदयः, संयमी, जन सेवा परायणः, परोपकारी, सत्यनिष्ठः उत्तरदायित्व युक्तश्च भवेत्।

एभिः गुणैः सम्पन्नाः नागरिकाः एव राष्ट्रस्य विभूतयः भवन्ति। तेषाम् आधारे एव राष्ट्रस्य जीवनम् गौरवञ्च सुरक्षितम् भवन्ति। तेषाम् आधारे एवं लोकतन्त्रम् सफलम् भवति। लोकतन्त्रस्य रक्षकाः आदर्श नागरिकाः एव। लोकतन्त्रस्य महत्ता एवं वर्णिता :—

"सर्वेषाम् राज्य तन्त्राणां लोकतन्त्रम् विशिष्यते।"

२४. संस्कृतभाषायाः महत्त्वम्

परिष्कृतं, व्याकरणादिदोष रहितं यत् भाषा तत् संस्कृतम् अस्ति। इयं भाषा एवं देववाणी, सुरभारती, गीर्वाणवाणी इत्यादिकैः नामभिः व्यवह्रियते। संस्कृत भाषा संसारस्य सर्वासु भाषासु प्राचीनतमा, परिष्कृततमा च विद्यते।

अस्याः भाषायाः साहित्यम् अपि सुविशालं, परमोन्नतं, विविध- ज्ञान-समन्वितं च अस्ति। भारतस्य प्राचीनाः ग्रन्थाः चत्वारः वेदाः संस्कृतभाषायां सन्ति। धर्मशास्त्राणि, अष्टादश-पुराणानि, अष्टादश स्मृतयः, षट् दर्शनानि च संस्कृत भाषायां एव लिखिताः सन्ति। सम्पूर्ण कर्मकाण्ड विभागः सम्पूर्ण च आयुर्वेद पद्धतिः, एते सर्वे ग्रन्थाः संस्कृतभाषायां एवं निबद्धाः सन्ति। एतेषाम् अध्ययनेन भारतवर्षस्य, प्राचीन धर्मस्य, आयुर्वेदस्य, तथा अतीत सभ्यतायाः पूर्णः परिचयः प्राप्यते। एवं संस्कृत वाग्ङमय एव भारतस्य संस्कृतेः आध्यात्मिकस्य च ज्ञानस्य विशुद्ध रूपज्ञानाय एकं साधनम्। एवं इयं भाषाः प्राचीनतमा इति निर्विवादम्।

कतिपयैः उदाहरणैः अस्याः परिष्कृतिः अपि प्रकटयितुम् शक्यते। आंग्लभाषायां लिख्यते 'बुट' (But) पठ्यते च 'बट', लिख्यते पुट (Put) पुनः बटवत् 'पट' इति न पठ्यते। एवमेव अनेकानि भ्रष्टभाषायाः उदाहरणानि सन्ति। संस्कृतमेव सा भाषा यस्यां यत् लिख्यते तदेव पठ्यते।

संस्कृत भाषाःन केवलं उच्चारणे सर्वोत्कृष्टा अपितु मधुरा दिव्या च। इयं भाषा आचारशास्त्र शिक्षिका, जीवनोन्नतिकारिणी च अस्ति। ये कथयन्ति यत् संस्कृत-भाषा कठिना वर्तते, ते न जानन्ति यत् स्वल्प प्रयासेनैव संस्कृतं पठितुं शक्यते। संस्कृत भाषाः अस्माकं देशस्य सांस्कृतिकः निधिः अस्ति। सम्पूर्णमपि सांस्कृतिकं वाङ्मयं संस्कृतमाश्रित्य एव अवतिष्ठते। संस्कृत्याः वाङ्मयेन रहितस्य राष्ट्रस्य जातेश्च अधः पतनम् अनिवार्यम्। संस्कृस्य एतादृशं महत्त्वं दृष्टैव कश्चित् कविना सत्यम् एव उक्तम्:—

"भारतस्य प्रतिष्ठे द्वे, संस्कृतं चैव संस्कृतिः"

अद्यत्वे केचित् मूढाः संस्कृतं मृतभाषां कथयन्ति।ते न जानन्ति यत् ये संस्कृतस्य रसेन, ज्ञानेन, संस्कृति बलेन अद्यापि कृतकृत्याः भवन्ति किं तेभ्यः संस्कृत भाषा मृता ? पुनरपि यदि केचित् कुपुत्राः स्वजननी सदृशीम् इमां भाषां मृतां कथयन्ति, येन च भारतवर्षे संस्कृत भाषा उपेक्ष्येत, तर्हि गीर्वाण वाणी एव क्षमयतु तेषाम् अपराधः। यतो हि—

कुपुत्रो जायेत् क्वचिदपि कुमाता न भवति।

२५. विद्या ददाति विनयम्

ज्ञानार्थकाद् 'विद्' धातोः विद्याः शब्दः सम्पद्यते। कस्यापि वस्तुनः विषयस्य वा यथार्थतः ज्ञानं 'विद्या' इति उच्यते। विद्या श्रेष्ठं गुप्तं च धनं वर्तते। मनुष्याणां रूपं यौवनं च नश्यति परं इदं धनं गुप्तरूपेण सदामनुष्यस्य समीपम् एव वसति। विद्या धनं न चौराः चोरचितुं शक्नुवन्ति, धनानि व्यये कृते क्षीयन्ते परं इदं धनं तु व्ययेन वृद्धिं प्राप्नोति। विद्या धनं सर्वश्रेष्ठं धनमुच्यते। उक्तं च—

न चौरहार्यं न च राजहार्यं न भ्रातृ भाज्यं न च भारकारि।

व्यये कृते वर्धत एवं नित्यं विद्याधनं सर्वधन प्रधानम्॥

संसारे ते एव मनुष्याः उन्नतिं कुर्वन्ति ये बाल्ये अनेक विधं कष्टमनुभूय विद्याम् अभ्यस्यन्ति। विद्यैव वास्तविकं सौन्दर्यं वर्तते। विदेशे विद्या बन्धुवत् सहायिका भवति। विद्वज्जनानां शोभां विस्तारयति। विद्या एवं पुरुषस्य सर्वाणि कार्याणि साधयति—

मातेव रक्षति पितेव हिते नियुङ्क्ते कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिम्, किं किं न साधयति कल्पलतेव विद्या॥

मनुष्यानां जीवने विद्या परमोपयोगिनी भवति। राजा दण्डशक्तिधारणात् स्वदेशे बलात् पूज्यते परं विद्वान तु सर्वत्र एव श्रद्धया पूज्यते। विद्वांसः पुरुषाः यत्र गच्छन्ति तत्रैव तेषां सत्कारः भवति। सत्यमेव उक्तं—

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।

विद्या एव तद् वस्तु विद्यते येन मनुष्यस्य पशोः च भेदः कर्तुं शक्यते। विद्यया एव मनुष्याः स्वकीयं कर्त्तव्यं जानन्ति। विद्या विहीनः नरः पशु तुल्यो भवति। उक्तं च सत्यमेव—

"विद्या विहीनः पशुः"

अस्मिन् संसारे विद्यैव सुखस्य मूलम् अस्ति। विद्या मानवाय नम्रतां ददाति। विनयेन मानवः योग्यतां प्राप्नोति। योग्यतया धनं प्राप्नोति। धनेन धर्मं भवति। धर्मेण च सुखं प्राप्नोति। उक्तमपि—

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वात् धनमाप्नोति धनाद् धर्मः ततः सुखम्॥

अस्मिन् संसारे ये महापुरुषाः अभवन् ते शैशवे महता परिश्रमेण विद्याम् अधीतवन्तः। बालाः बाल्ये अवश्यं विशेष रूपेण च विद्यामभ्यस्यन्तु। इदं च सदा स्मर्तव्यम्—

क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्॥
क्षण त्यागे कुतो विद्या, कण त्यागे कुतो धनम्॥

२६. भारतीया संस्कृतिः

'सम' उपसर्ग पूर्वकात् 'कृ' धातो क्तिन् प्रत्यये कृते 'संस्कृति' शब्दो सम्पद्यते। संस्करणं परिष्करणं चेतसः संस्कृतिः इति उच्यते। संस्कृतिः चेतसः अज्ञानं दूरी कृत्य ज्ञान ज्योतिं प्रकाशयति। भारतीया संस्कृतिः संसारस्य सर्वासु संस्कृतिषु श्रेष्ठाः प्राचीनतमा च अस्ति।

भारतीया संस्कृतिः वेदमूला अस्ति। अस्याः आत्मा सत्यम् अस्ति। त्यागः, करुणभावः, दया, सेवा च भारतीया संस्कृतेः विशेषता अस्ति। 'अहिंसा' अस्माकं संस्कृतेः आदर्शः अस्ति। वर्ण-व्यवस्था, आश्रम व्यवस्था, आध्यात्म-चिन्तनं, सहिष्णुता च भारतीया संस्कृतेः प्राणाः सन्ति। भारतीया संस्कृतिः सदैव पर कल्याणम् चिन्तयति न तु आत्म कल्याणे एव केन्द्रिता। अतएव उच्यतेः—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाक् भवेत्॥

अस्मांक संस्कृतिः कर्मप्रधाना अस्ति। अस्याम् आनन्दस्य प्राप्त्यै पुरुषार्थस्य महत्त्वम् प्रतिपादितम्। अस्माकं संस्कृतेः इयमपि विशेषता यत् एतया मानव जीवनस्य उद्देश्यम् 'मोक्षः' इति निर्धारितम्। भारतीया संस्कृतिः 'सत्यं शिवं सुन्दरं' पूजयति।

विश्व बन्धुत्वस्य भावना भारतीय संस्कृतेः अनिर्वचनीया विशेषता विद्यते। सा न केवल मनुष्येषु अपितु सर्वेषु प्राणिषु मदार्थेषु च एकस्यैव परमात्मनः विभूतिम् पश्यति। अतएव गीतायाम् कृष्णेन उक्तम्—

विद्या विनय सम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥

भारतीया संस्कृतिः एवं भारतीयानां जीवनम् अनुशास्ति। अतएव पुरा अस्माकं देशः 'जगद्गुरुः' आसीत्।

२७. स्त्री शिक्षायाः आवश्यकता

गृहस्थ रथस्य नर-नारी रूपं चक्रद्वयम्। रथस्य संचालने द्वयोरपि समानः सहयोगः वर्तते। एकस्य अपि अभावेन रथः चलितुं न शक्नोति। गृहस्थ रथस्य द्वयोः चक्रयोः कृते शिक्षारूप तैलस्य परमावश्यकता भवति।

यस्मिन् कुटुम्बे नार्यः शिक्षिताः न भवन्ति, तस्मिन् कुटुम्बे प्रतिदिनम् एव कलहादि भवति। येन तस्य कुटुम्बस्य उन्नतिः कथमपि भवितुं न शक्याः। सुशिक्षिता स्त्री सद्गृहिणी सत्कर्म परायणा च भवितुमर्हति।

स्त्री एव मातृपद गौरवं प्राप्नोति। शिशोः पालनं, शिक्षादानञ्च मातृकर्त्तव्ये भवतः। यदि माता स्वयं न शिक्षिता स्यात् तदा सा स्वशिशवे शिक्षादानं कथं करिष्यति। तस्मात् स्त्रीणां कृते शिक्षायाः परमावश्यकता वर्तते। शिक्षा अज्ञानरूपं अंधकारं नश्यति। अतएव उक्तं

"कन्या ऽप्येवं लालनीया शिक्षणीया प्रयत्नतः"

प्राचीन समये भारतवर्षे स्त्रीशिक्षायाः महान प्रचारः आसीत्। उषा, गार्गी, मैत्रेयी प्रभृतीनां नारीणां चरित्राणि तासाम् उच्चशिक्षां कथयन्ति। स्वतन्त्र भारते नारी शिक्षायाः महती समुन्नतिः दृश्यते। पश्यन्तु भवन्तः? हिन्दी साहित्य क्षेत्रे ज्ञानपीठ पुरस्कारेण सम्मानितां महादेवी वर्मा को न जानाति। महादेवी वर्मा स्वज्ञान गरिम्णा सम्पूर्ण स्त्रीजातिं गौरवान्वितं अकरोत्।

अतः देशस्य समाजस्य च समुन्नत्यै स्त्रीशिक्षा परमावश्यकी वर्तते। स्त्रियः मातृशक्तेः प्रतीकभूताःभवन्ति अतः तासाम् सदा सम्मानः कर्त्तव्यः। यस्मिन् समाजे समाजे स्त्रीणाम् आदरो भवति सः समाजः उन्नतिम् प्राप्नोति। मनुना उक्तम्—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वाः तत्राफलाः क्रियाः॥

२८. परोपकाराय सताम् विभूतयः

मनसा वाचा कर्मणा च परेषाम् उपकारः 'परोपकारः' कथ्यते। अस्मिन् जगति परोपकार समम् किमपि श्रेष्ठं पुण्यं न विद्यते। परोपकारस्य महिमा सर्वत्र दृश्यते। सज्जनेषु एवं परोपकारस्य भावना भवति न दुर्जनेषु। अस्मांक देशे अनेके परोपकारिणः पुरुषाः अभवन्। महर्षि दधिचिः परोपकाराय स्व अस्थीनि दत्तवान्। महाराजः शिविः कपोतस्य रक्षणार्थं स्वमांसम् अददत्। परोपकारिणः दीनेभ्यः दानम्, निर्धनेभ्यः धनम् वस्त्र हीनेभ्यः वस्त्रम्, बुभुक्षितेभ्यः अन्नम् दत्त्वा प्रसन्नाः भवन्ति।

अचेतनाः अपि पदार्थाः परोपका रताः दृश्यन्ते। वृक्षाः स्वयं तापं सहन्ते परम् आश्रितानाम् सन्तापं दूरी कुर्वन्ति। नद्यः परोपकाराय वहन्ति। गावः परोपकाराय, दुग्धं यच्छन्ति। सूर्यचन्द्रमसौ परोपकाराय एव प्रकाशेते। मेघाः परोपकाराय एव वर्षन्ति।

परोपकारिणां पुरुषाणां पुण्य प्रभावादेव लोकोऽयमभ्युदयं प्राप्नोति। परोपकारो हि आत्मसन्तोषस्य मूलम्। तेन हि सतां शोभा वर्द्धते, कीर्ति-कौमुदी च प्रसरति। उक्तं च भर्तृहरिणा—

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां
परोपकारैर्न तु चन्दनेन॥

परोपकारिणां सर्वस्वं परोपकाराय भवति। किं बहुना, परोपकाराय एव सतां विभूतयः भवन्ति। सत्यमेव उक्तम्—

पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति शस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः॥

अस्मिन् संसारे आत्मार्थे तु 'काकोऽपि जीवति चिरम्बलिं च भुङ्क्ते', किन्तु ते एव पुरुषाः धन्याः ये परार्थे कार्यं कुर्वन्ति। शास्त्रेषु परोपकारस्य महत्त्वम् एवं वर्णितम्—

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय, पापाय परपीडनम्॥

२९. 'सत्सङ्गतिः कथय किं न करोति पुंसाम'

मनुष्यः सामाजिकः प्राणी अस्ति। मनुष्यस्य स्वभावोऽस्ति यत् सः एकाकी सन् न प्रसीदति। सः बाल्यादेव अन्येषां संगे वसति, वर्धते, उन्नतिं च लभते। यस्य पुरुषस्य यादृशः संगः भवति, सः पुरुष तादृशः एव भवति। यदि सः सज्जनानां संगतिः करोति, सज्जनैः सह तिष्ठति, तर्हि सः सज्जनः भवति। यदि च सः दुर्जनानां संगतिः करोति, दुर्जनैः सह तिष्ठति तर्हि सोऽपि दुर्जनः भवति। एवं च मानवः संगत्या एव गुणान् दुर्गुणान् वा प्राप्नोति। यथा चोक्तम्-

'संसर्गजाः दोषगुणाः भवन्ति'।

सत्संगत्या च सर्वे जनाः सुखं उन्नतिं च लभन्ते। यथा-पद्मपत्र-स्थितः जलबिन्दुः मुक्ताफलस्य शोभां लभते तथैव सामान्यः पुरुषः दुर्जनो वा सज्जनानां संसर्गेण महतीम् उन्नतिं प्राप्नोति। चौर्यरतोऽपि वाल्मीकिः संत्संगतेः प्रभावात् आदिकविः जातः। एवं दासीपुत्रो नारदः च देवर्षिः संजातः। बौद्ध भिक्षुकस्य उपगुप्तस्य सत्संगेन क्रूरः सम्राट् अशोकः अहिंसकः दयालुश्च संजातः।

का कथा मनुष्याणाम्? कीटोऽपि सुमनःसंगात् भगवतः शिवस्य शिरसि आरोहति। निकृष्टः काञ्चखण्डः रत्नस्य संसर्गेण रत्नं भवति।

बाल्यम् नाम एतादृशः कालः, यस्मिन् छात्राः मैत्रीम् वाञ्छन्ति। अतः बाल्ये एव छात्रेभ्यः उचितम् एतत्, ते परीक्ष्य एव स्वसंगति वासाय सुयोग्यं, सद्गुण सम्पन्नं छात्रम् मित्रं कुर्युः, यस्मात् अग्रे गत्वा सः बहुविधं सहाय्यं करोतु, हानिं च न करोतु।

मानवस्य अयं स्वभावः यत् कुसंगतेः प्रभावः तस्योपरि शीघ्रं पतति येन स अवनतिं विन्दति। कुसंगत्या तस्य स्वभावे कर्कशता, द्यूतक्रीड़ा, मद्यपानम्, धूम्रपानम्, समयोपेक्षा, हिंसाभावः, असत्यं तथाऽन्ये बहवो दोषाः आगच्छन्ति।

सत्संगतिः बुद्धेः जड़तां हरति, वाण्यां सत्यं सिञ्चति, उन्नतिं विदधाति, पापान् दूरीकरोति, चित्तं प्रसादयति, दिक्षु कीर्तिं च प्रसारयति। कथितं च—

जाड्यं धियो हरति, सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्संगतिः कथय किम् न करोति पुंसाम्॥

मित्र!कथय, सत्संगतिः पुंसां कि न साधयति, अपितु सर्वं साधयति एव।

३०. सत्यमेव जयते

सते (कल्याणाय) हितं सत्यम्। संसारे यथा दृष्टं, श्रुतं, कथितं, अनुभूतम्, चिन्तितं च तथैव निर्व्याजरूपेण कथनं 'सत्यम्' इति अभिधीयते। सत्यं समो नास्ति कश्चन धर्मः। समाजस्य स्थितिः सत्येनैव वर्तते। सर्वेषु गुणेषु सत्यमेव श्रेष्ठम् गुणम् अस्ति। सत्ये हि परमेश्वरस्य वासोऽस्ति।

सत्यभाषाणेन मानवस्य मनः पवित्रं भवति। यो जनः सत्यं गृह्णाति सः जीवने सर्वेषु कार्येषु सफलतां लभते। अस्माकं शास्त्रेषु अपि सत्यस्य महिमा वर्णिता अस्ति। महाभारत ग्रन्थे तु महर्षिणा व्यासेन उक्तम्—

नास्ति सत्यात् परोधर्मः नानृतात् पातकं परम्।

स्थितिर्हि सत्ये धर्मस्य तस्मात् सत्यं न लोपयेत्॥

मानव सत्येन जगति महद् यशः प्राप्नोति अद्यापि सत्यवादिनः हरिश्चन्द्रस्य यशः गीयते। धर्मराजः युधिष्ठिरः सत्यकारणात् एव स्वर्गस्य अधिकारी जातः। सत्यप्रतिज्ञः भीष्मः अपि सत्यकारणात् आजीवनं विवाहं न अकरोत्। अतः अद्यापि सर्वे जनाः तं सादरं स्मरन्ति। मनुस्मृतिकारेण श्री मनुना अपि धर्मस्य लक्षणेषु सत्यस्य गणना इत्थं कृता—

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रिय निग्रहः।
धीः विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥

सत्यस्य भाषणेन मनुष्यः निर्भीको भवति। यः कश्चित् सत्य भाषणं करोति तस्य जीवनम् सफलं भवति। ये सत्यम् परित्यजन्ति, असत्यंच भाषन्ते ते पापं कुर्वन्ति। सत्य भाषणं वस्तुतः सर्वोत्तमम् तपः वर्तते। अतएव उक्तम्ः—

अश्वमेध सहस्त्रं च सत्यं च तुलया धृतम्।
अश्वमेध सहस्त्राद् हि सत्यमेव विशिष्यते॥

भारतस्य राज चिह्नेऽपि "सत्यमेव जयते" इति आदरेण उल्लिखितम् अस्ति।

३१. अहिंसा परमो धर्मः

प्रायः जीवानां वधः 'हिंसा' इति उच्यते। परं मनसा वाचा कर्मणा वा कस्यापि जीवस्य परिपीडनम् 'हिंसा' इति कथ्यते। एवं हिंसा त्रिविधा भवति-मानसिकी हिंसा, वाचिकी हिंसा, कायिकी हिंसा च। तत्र सर्वप्रकारक हिंसानाम् त्याग एवं 'अहिंसा' भवति।

सर्वेषु धर्मेषु अहिंसायाः प्राधान्यं वर्तते। संसारस्य सर्वाचार्यैः अहिंसाया गौरवं तारस्वरेण गीयते। अस्मिन् संसारे एतादृशः कोऽपि धर्म प्रवर्तको धर्म प्रचारको वा न वर्तते यः अहिंसायाः महतीं आवश्यकतां न स्वीकुरुते। भारतवर्षे अहिंसायाः प्रतिष्ठा अति प्राचीना अस्ति। भारतीया संस्कृतिः सर्वदैव अहिंसाप्राधानः आसीत्। अत्र अनेके महापुरुषाः अभवन् ये स्वजीवने अहिंसाव्रतं गृहीत्वा एव लोक पूज्यताम् अवापुः। मनुना चातुर्वर्ण्यार्थम् अहिंसायाः महत्त्वं निरूप्यतेः—

अहिंसा सत्यमस्तेयं शौचमिन्द्रिय निग्रहः
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥

विश्वामित्रं प्रति वशिष्ठस्य अहिंसाश्रयणम् सर्वजन प्रसिद्धं वर्तते। तस्मात् विश्वामित्रापेक्षया वशिष्ठः श्रेष्ठः अभवत्। महात्मा बुद्धः अहिंसायाः श्रेष्ठः प्रचारकः आसीत्। अतएव अद्यापि न केवलं अस्माकं देशे एव अपितु विदेशेषु अपि अहिंसायाः धारा प्रवहति। कलिंग संग्रामे रक्तपातं दृष्ट्वा अशोक नृपतेः हृदये अहिंसायाः सञ्चारः अभवत्। अहिंसा बलेन एव सम्राट् अशोकः 'महान्' इति पदं लब्धवान्।

जैन धर्मे अपि अहिंसायाः अनिवार्यत्वम् उपदिश्यते। अहिंसा बलेनैव महात्मा गांधी 'महात्मा' 'बापू' च पदेन सम्पूर्णे संसारे प्रसिद्धम् अभवत्। स अहिंसा शस्त्रेण एव भारतीय स्वातन्त्र्य संग्रामे विजयी बभूव। अहिंसा शस्त्रेण भीताः गौराङ्गाः शासकाः भारतभूमिं विहाय पलायिताः।

विश्वे सर्वे प्राणिनः सुखम् वाञ्छन्ति। न कोऽपि स्व विनाशं इच्छति। यदि एवमेव पशु-पक्षिणाम् विषये अस्माकम् चिन्तनम् स्यात् तर्हि न कस्यचिद् हननम् कोऽपि करिष्यति। परस्य पीड़ा स्व पीड़ा एव अनुभूयते धार्मिकैः—

उत्तम् चः—

श्रूयताम् धर्म सर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषाम् न समाचरेत्॥

३२. सदाचारः

सतां आचारः सदाचारः इति कथ्यते। सज्जनाः यथा आचरन्ति तद्वद् आचरणं सदाचारः। सदाचारे प्राधान्येन संयमः, दमो, सत्यं, अहिंसा, ब्रह्मचर्यः आदयः गुणानाम् समावेशः भवति। सदाचारः एव साक्षाद् धर्मः। मनु स्मृतौ उक्तं च मनुना—

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम्॥

सदाचारेण शरीरं पुष्टं भवति, सदाचारेण मनुष्यः सत्कर्म कर्तुं प्रवृत्तो भवति, सदाचारिणः बुद्धिः निर्मला भवति विकसितं भवति च।

सदाचारेण एवं मानवस्य यशः सर्वत्र प्रसरति। एवं सदाचारेण मानवस्य सर्वविधा उन्नतिः भवति। सत्यमेव उक्तं—

सदाचाराद् यशो लोके सदाचारात् सुखं दिवि।
सदाचाराद् भवेन्मोक्षः सदाचारो हि कामधुक्॥

आचारविहीनः पापभाग् भवति। तस्य समस्ताः क्रियाः निष्फलाः भवन्ति सर्वत्र च निन्दितो भवति। उक्तंच—

दुराचारी हि पुरुषः लोके भवति निन्दितः।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च॥

न केवल मनुष्याणां कृते एव अपितु देवानां कृते अपि सदाचारस्य महत्त्वमस्ति। अस्मांक देशे अनेके सदाचारिणः पुरुषाः अभवन्। श्री रामः, श्रीकृष्णः, महात्मा बुद्धः, आदयः महापुरुषाः सदाचारेण एव संसारे महान्तः पूज्याः च संजाताः। अतः अस्माभिः अपि सदाचार-नियमानां पालनं कर्त्तव्यम्। सत्यमेव उक्तं महाभारते यत् मनुष्यैः स्व चरित्रस्य रक्षा कर्त्तव्या, धनम् तु याति आयाति च। सदाचारेण हीनः नरः, सदैव निन्दनीयः घृणास्पदः च भवति निर्धनः स्व निर्धनतायाम् सन्तुष्टः सन् न निन्दनीयः न घृणास्पदो भवति।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः॥

(३३) समयस्य सदुपयोग:

यत् कार्यं यस्मिन् समये करणीयम् भवेत् तत्कार्यं तस्मिन्नेव समये कुर्यात्- अयमेव समयस्य सदुपयोग: अस्ति। मानव जीवने एकैकम् क्षणम् अमूल्यम् वर्तते। यत् विनष्ट: समय: केनापि उपायेन पुन: न आयाति। अत: बुद्धिमन्त: मनुष्या: सदैव समयस्य सदुपयोगं कुर्वन्ति मूर्खाश्च तस्य दुरुपयोगे संलग्ना: भवन्ति। उक्तम् च—

काव्य शास्त्र विनोदेन कालो गच्छति धीमताम्।

व्यसनेन च मूर्खाणाम् निद्रया कलहेन वा।

ये मनुष्या: आलस्येन निरर्थकं समयं यापयन्ति, यथोचिते समये कार्यं न सम्पादयन्ति, द्यूते, कलहे, भ्रमणे, नृत्यदर्शने, पिशुनतायां च समयं यापयन्ति ते कदापि स्वकार्येषु सफलतां न लभन्ते। येन ते कदापि सुखेन नैव तिष्ठन्ति यत: कथितम्—

लम्बमानस्य कार्यस्य काल: पिबति तद्रसम्।

पश्यत, ये छात्रा: समयस्य उपयोगं कृत्वा अहर्निशं पठन्ति ते प्रथम श्रेणीम् प्राप्नुवन्ति, ये इतस्तत: परिभ्रमन्, क्रीडन् समयं यापयन्ति ते तृतीय श्रेणीमपि न प्राप्नुवन्ति। यथासमयं कृषका: महता परिश्रमेण क्षेत्राणि कर्षित्वा बीजानि वपन्ति, जलेन सिञ्चन्ति, श्रमम् कठिनम् श्रमम् कुर्वन्ति। तेषाम् श्रमेण निरीक्षणेन च कृषौ प्रभूतम् अन्नम् उत्पद्यते॥ तेन ते सुखं प्राप्नुवन्ति। ये च यथासमयं न क्षेत्राणि कर्षन्ति, न वपन्ति ते दरिद्रा: दु:खिनश्च भवन्ति। सत्यमेव उक्तम्—

प्रथमे नार्जिता विद्या, द्वितायेनार्जितं धनम्।

तृतीये नार्जितं पुण्यं, चतुर्थे किं करिष्यति।

अत: अस्माकमपि एतत् कर्तव्यं यत् वयं समय-नाशकरान् दोषान् आलस्यं, निद्रां दीर्घसूत्रतां च परिहराम:।

अत: स्व कल्याणाय समयस्य महद् मूल्यं ज्ञात्वा आलस्यं त्यक्त्वा, कर्मशीलो भूत्वा तस्य सदुपयोगं कुर्याम।

उक्तम् च :-

गच्छन् पिपीलिको याति योजनानाम् शतान्यपि।

अगच्छन् वैनतेयोऽपि पदमेकम् न गच्छति॥

(३४) अनुशासनम्

अनु पूर्वात् शास् धातोः ल्युटि अनुशासनं सिध्यति। कस्यापि व्यवस्थितस्य नियम समुदायस्य पालनम् 'अनुशासनम्' कथ्यते। यदि अनुशासनं न भवेत् तदा कोऽपि कार्यः पूर्णतां न गच्छेत्। अस्माकं जीवनस्य सर्वासु दशासु अनुशासनस्य महती आवश्यकता वर्तते। विद्यालये, गृहे, देशे, समाजे वा एतद् बिना कार्यं न भवति।

परिवारे अनुशासनस्य महती आवश्यकता भवति। अनुशासनेन एव तत्र शान्तिः भवति। सन्ततयः मातृणात्, पितृणाम अन्य ज्येष्ठानाम्, वृद्धानां च आज्ञां पालयन्तु, स्वकर्त्तव्यं च जानन्तु, तद्नुसारम् च आचरन्तु। यस्मिन् समाजे देशे वा अनुशासनं न भवति, तस्मिन् देशे समाजे वा शान्तिः न भवति। यतो हि अनुशासनं बिना देशस्य समाजस्य वा सर्वे अपि नागरिकाः स्वेच्छाचारिताम् अवलम्ब्य नियन्त्रक पुरुषस्य आज्ञाम् अनादृत्य स्वयं व्यवहरन्ति। स्वेच्छाचारेण अन्याः नागरिकाः कष्टम् अनुभवन्ति। येन शान्तिः दूरं गच्छति। शान्तिं बिना देशे समाजे वा सर्वत्र अव्यव- स्थायाः साम्राज्यं जायते।

विद्यालयेषु अपि अनुशासनस्य परिपालनम् अत्यावश्यकम् अस्ति। ये छात्राः गुरोः अनुशासने विद्याध्ययनं कुर्वन्ति ते स्वजीवने सर्वदा सफलतां प्राप्नुवन्ति॥ यथा जीवनं बिना शरीरं, जलं बिना कूपः पतिं बिना वनिता, चन्द्रं बिना यामिनी, धर्मं बिना विद्या, सत्यं बिना तपो न शोभते तथैव अनुशासनं बिना विद्यार्थी-जीवनं न शोभते। अद्यत्वे स्वतन्त्रे भारतवर्षे छात्रेषु अनुशासनं हीनता दृश्यते। छात्राः विद्यालयेषु गुरूणाम् आज्ञायाः अवहेलनां कुर्वन्ति। ये विद्यालयेषु श्रद्धापूर्वकं न पठन्ति, अध्ययनं प्रति उपेक्षां कुर्वन्ति ते अनुशासनहीनाः छात्राः कदापि विद्याध्ययनस्य पारं न यान्ति।

अस्मिन् भारते प्राचीन कालादेव अनुशासनस्य शिक्षोपरि महत्वं दीयते स्म। तदा सर्वत्र अनुशासनस्य साम्राज्यम् आसीत्। अनेकेषु ग्रंथेषु मानव जीवनस्य सफलतायै अनुशासनस्य शिक्षायाः महरवं वर्णितम्। मानवाः अनुशासन-पालनेन जीवने नानाविधं सुखं प्राप्नुवन्ति। अतः सर्वेऽपि उन्नतिकामैः जनैः अनुशासनस्य पालनम् अवश्यम् एव कर्त्तव्यम्।

(३५) 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः'
(उद्योगः)

आलस्यस्य त्यागः क्रियासु च प्रवृत्तिः एव 'उद्योगः' 'पुरुषार्थः' वा कथ्यते। अस्मिन् संसारे सर्वेजनाः सुखं इच्छन्ति। सुखं च परिश्रमेण बिना न लभ्यते। उद्योगेनैव जनाः स्वकार्येषु सफलतां लभन्ते। उद्योगः मानवस्य सर्वविधं मनोरथं पूरयति। अतएव उच्यते—

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

पुरुषार्थं बिना कस्मिन्नपि कर्मणि सफलता न भवति। सिंहस्य अपि मुखे मृगाः स्वयमेव न प्रविशन्ति—

उद्यमेन एव सिध्यन्ति कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

उद्योगेन असाध्यम् अपि कार्यं सिद्ध्यति। केचन भाग्यवादिनः उद्योगस्य उपेक्षां कृत्वा भाग्योपरि निर्भराः भवन्ति। येन ते न सुखं लभन्ते न च संसारे कीर्तिं लभन्ते।

सत्यमेव उक्तम्—

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी
दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या,
यत्नेकृते यदि न सिध्यति कोऽत्र दोषः॥

उद्योगे कृते अपि यदि कार्यं न सिध्यति तत्र मानवस्य किं दोषः ? यत् मानवाधिकारः कर्मणि एव अस्ति न कर्म-फल-प्राप्तौ। गीतायां भगवता कृष्णेन उपदिष्टम्—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

उद्यमेन एव अज्ञाः ज्ञान सम्पन्नाः, दुःखिनः च सुखिनः, अनिपुणाः निपुणाः, निर्बलाः सबलाः, भवन्ति। उद्योगं बिना तिलेभ्यः तैलम् अपि प्राप्तुं न शक्यते एवं उद्योगेनैव राष्ट्रं समृद्धं भवति। अतः —

अस्माभिः सर्वदा यथाशक्तिः उद्योगः करणीयः।

(३६) "सर्वेगुणाः काञ्चनमाश्रयन्ति"

कीदृशी बिडम्बना विधेः, कीदृशी विचित्रता संसारस्य, कीदृशी आश्चर्यपूरिता व्यवस्था भारतीय समाजस्य, कीदृशी दुरवस्था सरस्वती पुत्राणाम् यत् मूर्खोऽपि धनिकः पण्डितायते, जड़ोऽपि श्रीमान् धीमतायते, लक्ष्मी सम्पन्नः गर्दभः अपि गजायते। केनापि विद्वद्वरेण स्वसूक्तिना आत्मानम् सन्तोषयन् सत्यमेवोक्तम्ः—

इभ तुरग रथैः प्रयान्ति मूढाः,

धन रहिताः विबुधाः प्रयान्ति पद्भ्याम्।

गिरि-शिखिर गताऽपि काक पंक्तिः

पुलिन गतैः न समत्वमेति राजहंसैः॥

काकानाम् राजहंसानाम् च असमत्वं प्रदर्श्य आत्मतोषं प्राप्तम् कविना परम् वास्तविकता तु प्रथम पंक्तौ वर्णिता एव। गजरथैः, तुरग रथैः वा मूर्खाः यातायातं कुर्वन्ति परम् धनहीनाः विद्वांसः पद्भ्याम् एव प्रयान्ति एतादृशी तिरस्कृतिसंयुक्ता अव्यवस्था साम्राज्यते अस्मदीये एव भारते। यः देशः एकदा मंत्र द्रष्टाणाम् ऋषीणाम् ज्ञान भूमिः, राजर्षिणाम् त्याग भूमिः, तपोधनानाम् त्यागभूमिः, सर्वेषामेव आदर्श भूमिः आसीत् अद्य सा एव विदुषाम् तिरस्कार भूमिः विराजते।

अद्यत्वे धनस्य एव माहात्म्यं दृश्यते। धनेन बिना विद्योपार्जनम् अपि दुर्लभम्। यः धनसम्पन्नः स एव सुखेन शेते, सुखेन वर्धते। दुष्कर्म-विशेषज्ञ, अपि धन-प्रभावेण पुण्यात्मा इति कथ्यते। स एव श्रेष्ठ कुलोद्भवः, सुधीः, गुणज्ञः श्रेष्ठ वक्ता, सत्यवादी हरिश्चन्द्रः, दानवीरः कर्णः अपि सादरम् कथ्यते। उक्तम् च—

यस्यास्ति वित्तम् स नरः कुलीनः

स पंडितः, सः श्रुतवान्, गुणज्ञः।

स एव वक्ता स च दर्शनीयः

सर्वे गुणाः काञ्चनमाश्रयन्ति॥

धनस्य प्रशंसायाम् अन्येनापि केनापि कविना ईदृशमेव कथितम्—

धनैः निष्कुलीनाः कुलीनाः भवन्ति, धनैः आपदां मानवाः निस्तरन्ति।

धनेभ्यः परः बान्धवः नास्ति लोके, धनानि अर्जयध्वं, धनानि अर्जयध्वम्॥

असह्यमानात् दारिद्र्य दोषात् रिवन्नीभूय केनापि विदुषा इदमपि कथितम्

यस्यार्थाः तस्य मित्राणि यस्यार्थाः तस्य बान्धवाः

यस्यार्थाः सः पुमान् लोके, यस्यार्थाः स च पण्डितः।

अर्थहीनस्य मित्राणि, बान्धवाः न भवन्ति, सः पण्डितोऽपिन भवति, इति तु बुद्धिगम्यः। परन्तु सः मानव संज्ञामपि धारयितुम् न क्षमः सः पशुः एव इति न बुद्धिगम्यो जायते।

प्राचीनैः धर्मशास्त्र विशेषज्ञैः अपि धमार्थकाममोक्षात्मके वर्गे अर्थस्य उपयोगिता स्वीकृता यतः धनेन बिना जीवन निर्वहणम् अपि सुदुष्करम्।

अन्ते निष्कर्षमिदम् यत सरस्वत्याः वरद पुत्राणाम् लक्ष्म्याः वरद पुत्राणाम् च मध्ये न कदापि सौहार्द्रो भूतः, न कदापि भविष्यति। वाणीपुत्रास्तु सदैव उपेक्षिताः एव भविष्यन्ति अस्मिन् लक्ष्मी प्रधाने कलियुगे।

(३७) हितं मनोहारि च दुर्लभं वचः

मधुराणि वचनानि सर्वेषाम् कृते सुखकराणि, कटु वचनानि च दुःखकराणि भवन्ति। प्रायशः सर्वविदितमेतत् यत् स्नेह सिक्तानि मधुराणि वचनानि हितकराणि न भवन्ति। तेषां पृष्ठभूमौ कुकर्मस्य प्रेरणा भवति। गुरुजनाः कटुवचनैः एव छात्राणाम् पथ प्रदर्शनं कुर्वन्ति। मिष्ट भाषणेन अद्यावधि न कोऽपि वश्यतां गतः। गुरु जनानाम् ज्येष्ठानाम् च हितोपदेशाः कल्याणकारिणः भवन्ति। गुरुणाम् कर्कशोपदेशेन बिना उन्नतिः न सम्भवा। कटु औषधि-पानेन बिना शरीरस्य ज्वर सन्तापोऽपि न दूरी भवति। विदुरेणापि धृतराष्ट्रं प्रति कथितम्—

सुलभा पुरुषाः राजन् सततं प्रियवादिनः,
अप्रियस्य च सत्यस्य, श्रोता वक्ता च दुर्लभः।

सततं प्रिय वादिनः पुरुषाः सदैव सर्वत्रैव सुलभाः भवन्ति। परन्तु कटु सत्यस्य वक्ताऽपि दुर्लभः, श्रोताऽपि च दुर्लभो भवति। नीतिरियं अक्षरशः सत्या। हितकारकानि वचनानि सदैव अप्रियाणि भवन्ति। तेषाम् उपदेष्टारम् अपि भाग्यवन्तः लभन्ते। श्रोता च अस्त्येव न।

सत्यम् प्रियम न भवति, सत्यम् सदैव अप्रियं भवति।सत्यम् हितकरम् वचनम् प्रायेण कर्कशम् एव भवति। अतः मनुस्मृतौ प्रियं सत्यम् च वक्तुम् उपदेशम् कृतम—

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यम् अप्रियम्
प्रियं च नानृतम् ब्रूयात् एषः धर्मः सनातनः।

प्रियस्य सत्यस्य च संहतिः कठिना कष्टसाध्या च अतएव महाकवि भारवेः इदम् कथनम् सत्यमेव प्रतिभातिः—

"हितं मनोहारि च दुर्लभं वचः"

अन्येनापि विदुषा कथितम्—

मनीषिणः सन्ति न ते हितैषिणः,
हितैषिणः सन्ति न ते मनीषिणः।
सुहृच्च विद्वानपि दुर्लभो नृणाम्,
यथौषधम् स्वादु हितं च दुर्लभम्॥

(३८) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

"मातृदेवो भव"

उपनिषद्कारेण सत्यमेव आदिष्टम् यतो हि पुत्रस्य उपरि मातुः यादृशं वात्सल्यं भवति न तादृशं क्वापि दृश्यते पृथिव्याम्। माता पुत्रस्य कृते सर्वस्वमपि त्यक्तुं शक्नोति। सा स्वकीयानि कष्टानि विस्मृत्य पुत्रस्य सुख-चिन्तायामेव निमग्ना विराजते। पुत्रः जनन्याः मंगलमये उत्सङ्गे यम् सुखम् अनुभवति तत् स्वर्गापेक्षया अपि अधिकतरम् वर्तते। अतः पुत्रः बाल्यकालादेव मातरमेव सर्वतः अधिकम् मन्यते। यावज्जीवनम् अनेकानि असहनीयानि कष्टानि सहित्वा जननी पुत्रं पालयति संवर्धते च। अतः माता सर्वथा वन्दनीया, पूजनीया, अर्चनीयाश्च।

मनुस्मृतौ मनुना अपि कथितम्-

यं माता पितरौ क्लेशं सहेते सम्भवे नृणम्।
न तस्य निष्कृतिः शक्या कर्तुं वर्ष शतैरपि॥

जनस्य जन्मनः भूमिः एव 'जन्मभूमिः' इति कथ्यते। मनुष्यः यस्मिन् भू भागे जन्म लभते सः एव भूभागः तस्य जन्मभूमिः भवति। विदेशे स्थितः भारतीयः जन्मभूमिम् सदा स्मरति, तद्दर्शनस्य अभिलाषा तस्य हृदये सदैव वर्तते। भारतवर्षम् अस्माकम् देशः। इदम् अस्माकम् जन्मभूमिः। भारत मातुः सुविस्तीर्णे उत्सङ्गे वयम् सर्वेऽपि तत्पुत्राः भ्रातरः इव प्रेम्णा क्रीड़न्तः खादन्तः, पिबन्तः, विचरन्तः, उत्तरोत्तरम् वर्धमाना, पुष्टाः भवन्ति। फलतः जन्मभूमिः स्वाभाविक रूपेण प्रियत्वात् स्वर्गात् अपि गरीयसी वर्तते। अतः रामेणापि लक्ष्मणं प्रति उक्तम्:-

अपि स्वर्णमयी लंका, न मे लक्ष्मणः रोचते।
जननी जन्म भूमिश्च स्वर्गादपि गरीयसी॥

अतः अस्माभिः सदैव मातृभक्तैः स्वदेशभक्तैश्च भाव्यम्।

(३९) लोभः पापस्य कारणम्

न्यायेन अन्यायेन धनस्य एकत्रीकरणः, जीवन-निर्वाहार्थम् अथवा उपयोगार्थम् उपभोगार्थञ्च व्यये अरुचिः, एकं पणकम् रक्षितुम् स्वजीवनमपि-दातुम् उद्यतो नरः 'लोभी' इति कथ्यते हिन्द्याम्। लोभेन आकृष्टः नरः सदैव दुःखम् प्राप्नोति। लोभेन वशीभूतः नरः न खादयितुम् शक्नोति, न सुन्दराणि वस्त्राणि धारयितुम् शक्नोति, न किंचिदपि शुभकार्यं कर्तुं शक्नोति। कालक्रमानुसारेण आगतानि कष्टानि अपि मौनीभूय सहित्वा अर्जितस्य धनस्य प्राणपणेन-रक्षाम् करोति। तस्य जीवने का कथा मनोरंजनस्य, का कथा ऐहिक़ सुखस्य। लोभाविष्टः नरः येन केन प्रकारेण स्व कोषस्य संवर्धनाय सततम्ः दुष्कर्मेषु पापकर्मेषु वा संलग्नः जीवनम् यापयति। न जानाति सः, यत्-

दानं, भोगो, नाशः, तिस्त्रः गतयः भवन्ति वित्तस्य।

लोभोभिभूतः न दरिद्रेभ्यः धनम् ददाति नापि स्वयम् उपभोक्तुम् समर्थः भवति अतः धनस्य तृतीयाम् गतिम् एव प्राप्नोति।

लोभाविष्टस्य नरस्य पाप कार्येषु स्वयमेव प्रवृत्तिः उद्भूता भवति। कदाचित् सः परधनम् चोरयति, कदाचित् प्रवंचयति, कदाचित् स्वकीयेन मिथ्या भाषणेन सत्पुरुषान् पथ-भ्रष्टं करोति। परन्तु कदापि तस्य सन्तुष्टिः न जायते। पापकर्मणि निमग्नः सः गर्वातिशयम् अनुभवति। अतएव कथ्यते विद्वदभिः-

"लोभात् प्रभवति क्रोधः
लोभात् कामः प्रजायते।
लोभात् मोहश्च नाशश्च
लोभः पापस्य करणम्।"

पंचतन्त्रेऽपि विष्णुशर्मणा उक्तम्-

"अतिलोभाभिभूतस्य चक्रम् भ्रमति मस्तके"

लोभाभिभूतस्य नरस्य मस्तके चक्रम् भ्रमति अर्थात् जीवनपर्यन्तम् सः कष्टम् एव अनुभवति। अन्ते, कष्टमयं जीवनम् यापयित्वा प्राणपणेन अर्जितम् स्वकीयम् धनम् परेषाम् कृते विहाय यमलोकं प्रयाति। अतएव उक्तम्-

"अतिलोभो न कर्त्तव्यः"

(४०) सन्तोष एव पुरुषस्य परमनिधानम्

आधुनिके संसारे सर्वेजनाः सुखम् अन्वेष्टुम् तत्पराः सन्ति। परं सुखम् च 'गूलर पुष्पम्' भूत्वा न कुत्रापि दृष्टिपथम् आयाति। वैभव सम्पन्नशीलाः अपि दुःखम् लभन्ते, वैभव सम्पन्नहीनाः अपि दुःखम् अनुभवन्ति।

सुखं शान्तिश्च तदैव भवतः यदा मनुष्यः सन्तुष्टो भवति। मनुष्यः स्वकीयेन परिश्रमेण प्रयत्नेन वा यत् किंचित् अपि प्राप्नोति तेनैव स्वमनसि सन्तोषानुभूति करणम् सन्तोषः इति उच्यते। सन्तोषः एव सर्वेषाम् सुखानाम् मूलमस्ति। सन्तोषेण मानवाः सर्वं सुखम् लभन्ते। असन्तुष्टानाम् नराणाम् जीवनम् सदैव दुःखमयम्, कलहयुक्तम्, अशान्तिमयम् च भवति।

उदाहरणार्थम्- सर्पाः पवनम् पिबन्ति परम् न ते दुर्बलाः। वनगजाः शुष्कानि तृणानि वने खादन्ति परं ते बलिनः, मुनिवराः कन्दैः फलैः कालम् यापयन्ति परं ते ओजस्विनः भवन्ति। अतः सन्तोषः एव मानवस्य परम् निधानम् अस्ति। एवमेव कथितम् अस्मिन् श्लोकेः-

सर्पाः पिबन्ति पवनम् न च दुर्बलास्ते,
शुष्कैः तृणैः वनगजाः बलिनो भवन्ति।
कन्दैः फलैः मुनिवराः क्षपयन्ति कालम्,
सन्तोष एव पुरुषस्य परम निधानम्॥

अतः जीवने सुख-शान्ति लाभाय सन्तोषस्य महती आवश्यकता वर्तते। असन्तुष्टाः सदा दुखिताः भवन्ति, सन्तुष्टाः सदा सुखम् अनुभवन्ति। सन्तोषम् आश्रित्य अस्माकम् उन्नतिः असम्भवा, ये इत्थम् विचारयन्ति ते तु अल्पज्ञाः एव। मनसि सन्तोषे समागते सति न कोऽपि धनवान् भवति, न कोऽपि दरिद्रो भवति। मनस्विनाम् सन्तुष्टानाम् कृते कन्था-कौशेयंच समानमेव। उक्तञ्च—

वयमिह परितुष्टाः बल्कलैस्त्वं च लक्ष्म्या
सममिह परितोषो निर्विशेषो विशेषः।
स हि भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः।

अस्माकम् कृते धनम् न तु धनस्य कृते वयम् इतिसत्यम् सदैव स्मरणीयम्। धनस्य उपयोगिता सुख-शान्त्यर्थं भवति। अतः धनस्य कृते जनानाम् निन्दापात्रः, घृणा-पात्र; अप्रियश्च न भवेत्, स्वकीयां मानसिकाम् शान्तिम् न त्यजेत्, स्वास्थ्यं च न विनाशयेत्।

अतः सन्तोषः सर्वैरपि धारणीयः।

(४१) शठे शाठ्यं समाचरेत्

महाभारते उक्तम्:-

यस्मिन् यथा वर्तते यो मनुष्यः
तस्मिन् तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः
साध्वाचारः साधुना प्रत्युपेयः ॥

सत्यमुक्तम् महाभारत रचनाकारेण यत् यः मनुष्यः यम् प्रति यथा व्यवहारम् करोति तम् प्रति तथैव व्यवहर्तव्यः । दुष्टेन सह दुष्टता कर्त्तव्या साधुना सह साधुता कर्त्तव्या ।

कदाचार परायणः, दुर्बुद्धिः, शिष्टाचार विहीनः, पर निन्दापरः उच्छृंखलः, लम्पटः नरः 'शठ': इति कथ्यते । एतादृशाः मनुजाः राष्ट्रोन्नति घातकाः, समाजद्रोहिनः, स्वपरिवारस्य स्वस्य च अवनतेः कारणम् भवन्ति । एतादृशानाम् नराधमानाम् नियन्त्रणम् नियमनञ्च आवश्यकम् । तेषाम् दुष्कर्माणाम् प्रतिफले दण्ड-ताडनादि विधानम् न्यायोचितमेव ।

"शठं प्रति शठं कुर्यात्"

षड्विधाः आततायिनः अपि शठाः एव । मनुस्मृतिकारेण उक्तम्—

अग्निदो, गरदश्चैव, शस्त्रोन्मत्तो धनापहः
क्षेत्रदारहरश्चैतान् षड् विद्यात् आततायिनः ॥

गृहादि दाहकः, विषप्रदः, वधकर्ता, धनहर्ता, क्षेत्रहर्ता, स्त्रीहर्ता च ऐते षट्प्रकाराः आततायिनाम् । तेषाम् वधे न कोऽपि दोषः, ते दण्डनीयाः वध्याश्च ।

ये सत्पुरुषाः शठं प्रति शठताम् न आचरन्ति ते पश्चात्तापमेव अनुभवन्ति । 'किरातार्जुनीय' महाकाव्ये महाकवि भारविनापि एतस्यैव प्रतिपादनम् कृतम्—

व्रजन्ति ते मूढधियः पराभवं,
भवन्ति मायाविषु ये न मायिनः ।

ये नराः मायाविषु पुरुषेषु मायिनः न भवन्ति ते बुद्धिहीनाः सर्वदा पराजयं प्राप्नुवन्ति । ये सत्पुरुषाः सन्ति ते सम्यक् समादरणीयाः, तैः सह सद्भावपूर्वकमेव आचरणीयम् । रामः रावणस्य वधम् अकरोत् न तु सुग्रीवस्य ।

अतः शिष्टैः सह शिष्टता, धृष्टैः सह धृष्टता, सद्भिःसह सज्जनता एव समाचरणीया । शठस्य औषधम् शठता एव यथा—

'विषस्य विषमौषधम्'

महाकवि कालिदासेन अपि सुष्ठु उक्तम्—

"शाम्येत् प्रत्यपकारेण, नोपकारेण दुर्जनः ।"

(४२) संघे शक्तिः कलौ युगे

प्राचीनकाले तु एकः अपि पुरुषः स्वबाहुबलेन, विलक्षणेन सामर्थ्येन च महत् कार्यं कर्त्तुम् समर्थः बभूव किन्तु साम्प्रतम् न एतादृशः कोऽपि पुरुषः वर्तते। अद्य यत्र-कुत्रापि शक्तिः दृश्यते सा केवलम् संघ बलेन एव न तु व्यक्तिबलेन।

इदानीम् समाजे ये जनाः संघटिताः सन्ति ते कामपि सामाजिकीं रीतिं, मर्यादाम् परित्युक्तम् शक्नुवन्ति न कोऽपि तान् निवारयितुम् शक्तः भवति। इदानीम् छात्राणाम्, अध्यापकानाम्, कवीनाम्, महिलानाम्, साहित्यिकानाम् विविधाः संघाः सन्ति।

आर्थिक क्षेत्रेषु अपि विभिन्नाः संघाः दृश्यन्ते। यदि कोऽपि श्रमिकः एकाकी भवति न कोऽपि तस्य वार्ताम् श्रृणोति। यदि सः एव श्रमिकः स्वकीयां व्यथाम् स्वसंगठन माध्यमेन कथयति तदा सा मान्या भवति। संघटिताः श्रमिकाः, संघटिताः व्यवसायिनः, संघटिताः प्रकाशकाः, संघटिताः लेखकाः, संघटिताः उद्योगिनः शक्तिशालिनः जायन्ते।

संघस्य इयम् शक्तिः राजनैतिकक्षेत्रेषु सर्वविदिता एव वर्तते। देशभक्तः जनसेवकः यदि एकाकी अस्ति, न कोऽपि तम् पृच्छति। यदि कोऽपि मूर्खः अशिक्षितो वा कस्यापि संघटनस्य सदस्यो भूत्वा तस्य नेता भवति सः विधानसभायाः सदस्यत्वेन निर्वाचितो भवति मन्त्रि—पदमपि अलंकरोति च।राष्ट्रपति पदस्य निर्वाचिने सः एव जनः निर्वाचितः भवति यस्य संघः भवति।

लौकिक व्यवहारेऽपि निर्बलानि सामान्यानि तृणानि, यानि कोऽपि त्रोटुम् समर्थः भवति यदा रज्जुरूपं धारयन्ति तदा मत्ताः गजाः अपि तेन बद्धुम् शक्यन्ते। अतएव उक्तम्—

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वम् आपन्नैः बध्यन्ते मत्तदन्तिनः॥

अतः एव अभीष्टं प्राप्त्यर्थम् अस्माभिः सर्वदा सुसंघटितैः भाव्यम्।

(४३) सन्मित्रम्

अस्मिन् संसारे मित्रस्य आवश्यकता अपि अपरिहार्या अस्ति। मित्रं प्रति वयम् स्वीकीयानि सुखदुःखानि कथयन्ति। जीवनस्य गोपनीयानि वस्तूनि रहस्यानि चापि मित्रस्य समक्षे उद्घाटयन्ति। मानवस्य का कथा, पशु-पक्षिणोऽपि परस्परं मित्राणि भवन्ति। तेऽपि सहभोजनम्, सहवासं कुर्वन्ति। मानव जीवने तु समानशीलेषु, समान व्यसनेषु समवित्तेषु मनुष्येषु एव सख्यम् भवति।

विपरीत आचारेषु पुरुषेषु सख्यं न कदापि सम्भवम् भवति। सुरानुरक्ताः दुग्धानुरक्तान् न उपाश्रयन्ति। दुर्व्यसिनः सुबुद्धिम् दृष्ट्वा दूरादेव पलायन्ते।

उक्तम् च—

मृगाः मृगैः संगमनुव्रजन्ति
गावश्च गोभिः तुरगास्तुरंगैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः
समानशील व्यसनेषु सख्यम्॥

समानशीलोपरि आधारिता मित्रता चिरस्थायिनी भवति। गुणदोषान् अवेक्ष्य हि मित्रता कर्त्तव्या। सन्मित्रम् सदैव दुष्कर्मात् निवारयति, हिताय योजयते च। उत्तम मित्रं मित्रस्य दोषान् निगूहति, यथा समये गुणान् प्रकटी करोति। आपत्तिकाले सहायतामपि करोति। परमाणुतुल्यान् मित्रगुणान् पर्वतीकृत्य वर्णयति। आपद्गतम् मित्रम् न त्यजति। सन्मित्राणाम् विषये भर्तृहरिणा इदमेव लक्षणम् कथितम्—

पापन्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटीकरोति।
आपद्गतं न जहाति ददाति काले,
सन्मित्र लक्षणमिदम् प्रवदन्ति सन्तः॥

राम-सुग्रीवयोः मैत्री महर्षि बाल्मीकेन तुलसीदासेन च रामायणे सम्यक् प्रदर्शिता विद्यते। मैत्री-रक्षणार्थं रामः बालिम् जघान। सुग्रीवेणापि मनसा, वाचा, कर्मणा रामस्य सहायता कृता। महाभारतादिषु पुराणेषु कृष्णार्जुनयोः प्रीतिः वर्णिता एव।

मित्रस्यार्थे सन्मित्रम् स्वप्राणान् अपि अर्पयति इति दरीदृश्यते सन्मित्रवर्गेषु सुहज्जनेषु च। यथा शरीरस्य रक्षा शरीरस्थौ करौ निर्देशाभावेऽपि स्वयमेव कुरुतः तथैव मित्रस्य रक्षा यत्नात् स्वतः एव करणीया। कथितम् च केनापि विदुषा—

करौ इव शरीरस्य नेत्रयोः इव पक्ष्मणि।
अविचार्य प्रियम् कुर्यात् तन्मित्रम् मित्रमुच्यते॥

(४४) पर्यावरणम्

"स्वल्पं तथायुर्बहवश्च विघ्नाः"

कलियुगे मानवाः दीर्घजीविनो न भवन्ति। केचित् व्याधिपीडिताः, केचित् क्षुधा ताडिताः, केचित् दरिद्रता दूषिताः, केचित् पर्यावरण—भक्षिताः जनाः अल्पायुषाः भवन्ति प्रतिदिनम् यमलोकम् प्रयान्ति च। तेषु अन्येषु च कारणेषु प्रदूषितम् पर्यावरणम् अत्यधिकम् जीवन घातकम् वर्तते। अनेन मानव-शरीरे शनैः-शनैः विषारोपणम् क्रियते। अन्ते च अंगहीनो भूत्वा, अन्धो भूत्वा हृद्—रोगी भूत्वा च मृत्योः शरणम् गच्छति।

प्रकृतिः अस्माकम् संरक्षिका अस्ति। अभ्रंकषाः पर्वताः, मर्यादिताः गम्भीराः सागराः, सघनानि वनानि, सोत्पलानि सरांसि, नर्तनपराः नद्यः, अस्माकम् जीवन-वृक्षम् सम्वर्धयन्ति। हर्षिताः तरवः प्रसन्ना लताः वायोः विकारान् स्वयम् पिबन्ति अस्मभ्यम् स्वास्थ्य प्रदम् वायुमंण्डलम् प्रयच्छन्ति। वृक्षाः नाना प्रकाराणि फलानि, पुष्पाणि च दत्त्वा अस्मान् बहु उपकुर्वन्ति। वातावरणस्य वायोश्च परिशोधनम् कुर्वन्ति। वनानि एव पर्यावरणस्य सन्तुलनम् स्थापयन्ति।

साम्प्रतम् वयम् प्रकृतेः दूरात्दूरतराः जाताः। का कथा वनानाम्, इदानीम् तु पत्राणि, पुष्पाणि, फलानि अपि न दृश्यन्ते। वनानि छिन्द्यन्ते, फलाच्छादितानि उद्यानानि उच्छिद्य नवानि भवनानि, नगराणि, फैक्ट्री इति नामधेयानि यन्त्रागाराणि निर्मीयन्ते। नगराणि महानगराणि जातानि। कृषियोग्यानि क्षेत्राणि विनष्टीकृत्य हट्टानि विनिर्मीयन्ते।

भौतिकवादी युगे इदानीम् 'डीजल' पैट्रोल इत्यादि नामकैः तैलैः चालितानि यानानि, राजमार्गान् धूम्रमयान् कुर्वन् इतस्ततः धावन्ति गगने। वायुयानानि उड्डीयन्ते तेषु निर्गता धूम्रशिखाऽपि घातका एव। विभिन्नेषु उद्योग-संस्थानेषु यन्त्राणि अहर्निशं धूमायन्ति वायुमण्डलम्। अधुना तु स्वास्थ्य हानिकरं वायु प्रदूषणम् प्रतिक्षणम् वर्धते एव।

पर्वतानाम् शिलाखण्डानि विदार्य वनानि विच्छिद्य राजमार्गाणि विनिर्मीयन्ते। तेषु गिरि मार्गेषु दीर्घानि यानानि धावन्ति। नाना प्रकाराणाम् अस्त्राणाम् परीक्षणैः समुद्रस्य वातावरणम् अपि प्रदूष्यते। पर्वतानाम् वनसंरक्षणे चिपको आन्दोलनस्य जनकः श्री सुन्दरलाल बहुगुणा महोदयः भूरि-भूरि प्रशंसनीयः येन स्वकीये आन्दोलने समागतानि कष्टानि अविगणय्य पर्वतीयानि वनानि, वृक्षाणि च संरक्षितानि।

यथा प्रदूषण-विस्तारकाणि यन्त्राणि यानानि च परिवर्धन्ते तथा प्रदूषण-परिशोधन साधनानि न वर्धन्ते। धन-लाभाय वनानि छिन्द्यन्ते। मनोरंजनाय

वन प्राणिनः वध्यन्ते। नगराणाम् दूषितैः जलैः, मलिनवस्तुभिश्च गंगा, यमुना, सरयू प्रभृति नदीनाम् पावनम् जलम् प्रदूषितो भवति। का कथा थलचराणाम् नभचराणाम् वा जलचराः अपि न अवशिष्यन्ते हिंसकैः। अनेन जले, स्थले गगने च सर्वत्र प्रदूषणं जायते।

अतः वनानि उद्यानानि यत्नात् रक्षणीयानि। गृहे-गृहे शाक वाटिकानाम् स्थापनम् करणीयम्। वन प्राणिनाम् कृते अभयारण्यानाम् संख्या वर्धनीया। वृक्षाणाम् उच्छेदः दण्डनीयः भवितव्यः। येन सागराः निर्बाधम् समुल्लसन्तु, गगनमण्डलम् स्वच्छं भवतु।

(४५) जनसंख्या-वृद्धेः समस्या समाधानञ्च

अखिलं विश्वं इदानीम् जनसंख्यायाः वृद्धेः कारणात् चिन्तितम् अस्ति। विशेषतः विकासशीलाः देशाः जनसंख्यायाः वृद्धेः अत्यधिकाः विचिन्तिताः वर्तन्ते। इयमेव समस्या अस्माकम् देशेऽपि घनीभूता अस्ति।

अतीते भारते भारतीयाः मानवाः ब्रह्मचर्यव्रत धारकाः, संयम परायणाः च आसन्, अध्यात्म चिन्तनमेव जीवनस्य लक्ष्यम् स्वीकुर्वन्ति स्म। अतः तस्मिन् काले इयम् दुरन्ता समस्या एतादृशी न आसीत्, यादृशी अधुना वर्तते।

जनसंख्या वृद्धेः कारणात् देशस्य सम्मुखे अनेकाः समस्याः दृश्यन्ते। विशाले परिवारे दरिद्रतायाः निर्धनतायाश्च निवासो भवति। लक्ष्म्याः तथा परिवारोपयुक्त सुविधानाम् अभावे न तु सर्वाः बालकाः कन्यकाश्च सुखेन पठितुम् शक्नुवन्ति न च स्वस्थं एवं रोगरहितम् जीवनम् यापयितुम् शक्नुवन्ति। पर्याप्त दुग्ध-भोजनादीनाम् अभावे देशस्य भावी नागरिकाः अपुष्टाः, अशिक्षिताः, अस्वस्थाः भवन्ति। महति परिवारे सुखमयस्य शान्तिमयस्य जीवनस्य कल्पनापि कर्तुम् न शक्यते। राष्ट्रस्य सर्वतोन्मुखे विकासे, समाजस्य सर्वांगीणे अभ्युदये उत्तरोत्तरा वृद्धिशीला जनसंख्या भयावहम् अवरोधम् उत्पादयति।

एतदर्थम् आवश्यकम् यत् राष्ट्रस्य प्रत्येकः पुरुषः अस्मिन् विषये सुशिक्षितः भवेत्। छात्र-छात्राणाम् हृदयेषु बाल्यादेव ब्रह्मचर्यस्य, आत्मनिग्रहस्य, लघुपरिवारस्य, राष्ट्र कल्याणस्य महत्त्वं स्थापितं भवितव्यम्। भारतीयेषु हृदयेषु पुत्र-कन्यकयोः मध्ये भेद-बुद्धिः कष्टप्रदाः हानिकारकाश्च। उभयोर्मध्ये भेदस्य स्थाने समता-भावना भवितव्या। सत् शिक्षया एव एतत् सम्भवम्।

अतः संयम-नियमयोः सम्यग्रूपेण पालनं कर्तुम्, ब्रह्मचर्यस्य रक्षां कर्तुम्, लघु परिवारस्य विशिष्टताम् महत्त्वं च ज्ञातुम्, सच्चरित्रताम् धारयितुम् दृश्य-श्रव्य शिक्षायाः आवश्यकता वर्तते। अनया शिक्षया एव इमाम् समस्याम् समाधातुम् शक्यते।

(४६) विज्ञानस्य चमत्काराः

आधुनिकम् युगम् वैज्ञानिक युगम् इति कथ्यते। वैज्ञानिकाः नित्यं नवीनानि आविष्काराणि अनुसन्धानानि कुर्वन्ति। जीवनस्य सर्वेषु क्षेत्रेषु विज्ञानस्य व्यापकता सर्वत्र दरीदृश्यते। भोजने, गमने, शयने, मनोरंजने, अध्ययने, अध्यापने च सर्वत्रैव विज्ञानमेव द्रष्टिपथमायाति।

विज्ञानेन सर्वमपि सुलभीकृतम् सरलीकृतं व। वाष्पयानः, जलयानः, वायुयानः, हैलीकाप्टरादीनाम् आविष्कारेण दूरस्थानि स्थानानि अपि समीपस्थानि इव अनुभूयन्ते। विश्वस्य कस्मिन् अपि देशे स्थितैः परिजनैः सह एकस्मिन् एव क्षणे दूरभाषेण वार्तालापं कर्तुम्, कुशलक्षेमं च ज्ञातुम् समर्थः आधुनिकः मानवः। अद्य मानवेन चन्द्रलोकोऽपि प्रत्यक्षीकृतः, मंगलग्रहस्य यात्रां कर्तुमपि भारतीय वैज्ञानिकाः प्रयत्नरताः सन्ति। सामरिक महत्वस्य शत्रुस्थानानि विनष्टुंक्षमानि मारक शस्त्राणि अपि विनिर्मितानि भारतीय वैज्ञानिकैः १९९२ ईशवीये ख्रिष्टाब्दे।

विद्युत् आविष्कारेण कल्पनातीतानि सुखसाधनानि प्रदत्तानि। अन्धकारोन्मूलनाय विद्युत् दीपाः प्रकाश्यन्ते। आवासाः वातानुकूलिताः क्रियन्ते। उद्योगशालासु विशालानि यन्त्राणि परिचाल्यन्ते।

ज्ञान-प्रसारक्षेत्रे विज्ञानेन मुद्रण यन्त्राणि दत्तानि येन दुर्लभ ग्रन्थानाम् प्रकाशनम् अल्पव्ययेन भवितुम् शक्नोति। चलचित्रैः दूरदर्शनादिभिश्च विज्ञानं आबाल वृद्धानाम् मनांसि रंजयत्येव।

चिकित्सा-क्षेत्रे विज्ञानस्य गगन चुम्बिनम् साफल्यं दृष्ट्वा को न हर्षति। किन्नाम रोगनिदानस्य अद्य तु प्रायः सर्वेषाम् अपि अंगानाम् परिवर्तनम् शल्य चिकित्सकैः क्रियते। विकलांगानाम् कृते कृत्रिम अंगारोपणम् एका अन्या महती विशेषता चिकित्सा विज्ञानस्य।

विज्ञानस्य अभ्युदयेन संवर्धनेन च अनेकाः हानयः अपि समुद्भूताः सन्ति। विज्ञानस्य अभ्युदयेन श्रद्धा पक्षः, भावना पक्षः, कल्पना सुखश्च अस्तंगतः। प्रत्येके विषये तार्किक दृष्टिकोणः समुद्भूतः। सौहार्द्रं विहाय मनुजाः स्वार्थ पराः जाताः। विनाशकारिणाम् आयुधानाम् निर्माणेन मानवतायाः अस्तित्वमपि विपद्ग्रस्तम् जातम्। मानवाः श्रमहीनाः, कर्महीनाः, आलस्यपराः जाताः।

मानव कल्याणः विनाशो वा मानवस्य विवेकोपरि निर्भरः। लवित्रस्य प्रयोगः ग्रीवा कर्तनेऽपि भवितुम् शक्नोति शाक-फलादीनाम् कर्तनाय अपि।

(४७) महाकवि कालिदासः

जयन्तु ते सुकृतिनः रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरा-मरणजं भयम् ।

अस्मिन् संसारे बहवः कवयः सन्ति । ते ते स्वकाव्यबलेन धनं, यशश्च अर्जयन्ति । परं प्राचीनकाले अस्माकं देशे एतादृशाःअपि कवयोऽभवन् ये धनस्य यशसश्च इच्छां बिना एव काव्यरचनाम् अकुर्वन् । वस्तुतः ते एव महान्तः कवयः आसन् ।

अस्मिन् संसारे कोऽपि एतादृशः साहित्यप्रणयी नास्ति यो संस्कृत साहित्यस्य मूर्धन्यं कविताकामिनीविलासं महाकवि कालिदासं न जानाति । महाकवि कालिदासः न केवलं संस्कृत वांङ्मयस्य अपितु विश्ववांङ्मयस्य मुकुटालंकारः ।

अयं कवि सम्राट् कदा कुत्र च अभवत् इति स्पष्टं वक्तुं न शक्यते तथापि पुरातत्व-गवेषकाः इमं विक्रमादित्यस्य नवरत्नेषु सर्वश्रेष्ठः कथयन्ति । एका किंवदन्ती अस्ति यत् कालिदासः प्रारम्भे मूर्खः आसीत् । छलेन तस्य विवाहः एकया विदुष्या राजकन्यया सह अकरोत् । पश्चात् च भार्यया प्रताडितः सन् दुर्गायाः कालीस्वरूपात् वरं प्राप्य विद्वान् अभवत् । स विद्वान् भूत्वा स्वपत्न्याः विद्योत्तमायाः गृहं अगच्छत् अवदत् च—प्रियतमे ! अनावृतद्वारं कपाटं देहि । तत् श्रुत्वा विद्योत्तमा उक्तवती "अस्ति कश्चिद् वाग्विशेषः" अथ कालिदासः स्वपत्न्याः विद्योत्तमायाः वाक्यस्य प्रत्येकं पदं गृहीत्वा त्रीणि काव्यानि रचितवान्—'अस्ति' पदेन कुमार सम्भवं महाकाव्यं, 'कश्चिद्' पदेन मेघदूतं खण्डकाव्यम्, 'वाग्' पदेन रघुवंशं महाकाव्यम् च आरब्धवान् । महाकविना कालिदासेन रघुवंश कुमारसम्भवे महाकाव्ये, ऋतुसंहार-मेघदूते खण्डकाव्ये, मालविकाग्निमित्रम्-विक्रमोर्वशीयम्-अभिज्ञानशाकुन्तलम् इति नाटकत्रयम् विरचितम् ।

अभिज्ञानशाकुन्तलं नाटकं कालिदासस्य सर्वश्रेष्ठा कृतिः मन्यते । कालिदासस्य सम्पूर्णे काव्ये प्रसादं-गुणोऽस्ति, उपमायाश्च चमत्कारोऽस्ति । संस्कृतसाहित्य—जगति 'उपमा कालिदासस्य' इदि यत् प्रसिद्धम् अस्ति तत् सर्वथा सत्यमेव ।

कालिदासस्य ग्रन्थेषु सर्वेषां रसानां पूर्णपरिपाको अस्ति परं शृंगार रस चित्रणं तु सर्वथा अद्वितीयं वर्तते । प्रकृतिचित्रणे तु कालिदासः अतीव निपुणो वर्तते । सत्यमेवोक्तम् कालिदास विषये केनापि विदुषा—

पुरा कवीनाम् गणना प्रसंगे,
कनिष्ठिकाधिष्ठित कालिदासः ।
अद्यापि तत्तुल्य कवेरभावात्
अनामिका सार्थवती बभूव ॥

(४८) जगद्गुरुः शंकराचार्यः

परित्राणाय साधूनाम् विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय, सम्भवामि युगे-युगे ॥

गीतायाम् उक्तं इदम वचनम् चरितार्थयन् स्वयम् भगवान शंकरः शंकराचार्य रूपेण अवततार, इति विश्वसन्ति धर्मिकाः । एषः भारतभूमिः एतादृशानाम् प्रकाण्ड–पंडितानाम् महात्मनाम् तपस्विनाम् जन्मभूमिः कर्मभूमिश्च। द्वादश शतकानि अब्दानि व्यतीतानि यदा अयम् महापुरुषः दक्षिणस्य केरल प्रदेशे पूर्णा नद्यास्तटे कालरी ग्रामे जन्म अलभत्। अस्य महाभागस्य तातपादाः शिवगुरुः इति नामधेयाः संस्कृतस्य पारंगताः विद्वांसः आसन् तथैव पितामहश्च वेद–शास्त्र–तत्त्वज्ञः दार्शनिकः आसीत्। अल्पे वयसि एव पितरि पंचत्वं गते जननी एवास्य लालनं पालनम् अकरोत्। पंचमे वर्षे अयम् उपनयन-संस्कारेण संस्कृतो जातः।

युवावस्थामेव मातुः स्वीकृति-पश्चात् अनेन सन्यास–ग्रहणम् अकरोत्, गोविन्दनाथस्य च शिष्यताम् अंगीचकार। अस्य प्रगाढ़ पाण्डित्यम्, वाग्वैदग्ध्यम्, शास्त्र नैपुण्यम्, योग सामर्थ्यम्, भोग वैराग्यम् तु सर्वविदितमेव आसीत्।

शंकराचार्येण उपनिषदां भष्याणि, गीतायाः भाष्यम्, ब्रह्म सूत्रस्य भाष्यम्, अनेके प्रबन्धाः शतशः स्तोत्राणि काव्यानि च रचितानि। महापुरुषः अयम् अपूर्व मेधाशाली, असाधारण प्रतिभा सम्पन्नश्च आसीत्। अस्मिन् काले निमज्जतम् हिन्दू धर्मम् यदि कोऽपि उद्धर्तुम् सक्षमः आसीत् सः अयमेव शास्त्रार्थ महारथी, प्रकाण्ड विद्वान् शंकराचार्यः आसीत्। अनेन म्रियमाणे हिन्दू धर्म कलेवरे नास्तिकान् पराजित्य पुनः जीवनम् सञ्चारितम्।

आहिमालयात् कन्यान्तरीयं यावत्, वैदिकस्य सनातन धर्मस्य वैजयन्ती पुनः प्रसारयामास। भारतवर्षस्य चतसृषु दिशासु शंकराचार्य प्रतिष्ठापिताः चत्वारः मठाः अद्यापि विराजन्ते यत्र आदिगुरुः शंकराचार्य शिष्याः ततः प्रभृति शंकराचार्यस्य आसनम् सुशोभन्ते।

हिन्दू धर्मरक्षकः अयम् महापुरुषः भारतीयानाम् हृदय पटलेषु सर्वदैव विराजते सादरम् स्मृयते च अद्यापि अनवरतम्।

(४९) विश्व प्रसिद्धः वैज्ञानिकः
सी. वी. रमणः

विश्व प्रसिद्धस्य ,वैज्ञानिक मूर्धन्यस्य चन्द्रशेखर वेंकटरमण महोदयस्य नाम को न जानाति अस्मिन् विश्वे। अस्मिन् देशे बहवः वैज्ञानिकाः प्रादुर्भूताः परं तेषाम् चरित नायकोऽयम् रमण महोदयः अति प्रसिद्धः सर्वश्रेष्ठश्च।

महाभागः अयम् मद्रेषु १८८८ ईशवीये वर्षे त्रिचनापल्यां जन्म अलमत्। बाल्यकालात् एवं सः मेधावी कुशाग्रबुद्धिश्च आसीत्। द्वादश वर्ष—अवस्थायाम् एव अयम् मैट्रीकुलेन नाम्नी परीक्षायाम् उत्तीर्णः अभवत्। वर्ष द्वयानन्तरमेव एफ०ए०, परीक्षायाम् प्रथम श्रेण्यां सफलताम् प्राप। षोडष वर्ष—वयसि एव अयम् स्नातको बभूब। अस्य भैतिक विज्ञाने बाल्यकालादेव प्रवृत्तिः आसीत्। अस्मिन् विषये उपधि परीक्षायाम् स्वर्णपदकं प्राप।

अर्थ विभागे सर्वोच्च पदं प्राप्तये प्रतियोगिता परीक्षायामपि प्रथमं स्थानम् लेभे। तस्मिन्नेव वर्षे प्रथम श्रेण्यां एम. ए. परीक्षायामपि सफलतां प्राप्तः। अर्थ विभागे कार्यम् कुर्वन्नपि स्वकीयं प्रियं विषयं भौतिक विज्ञानं न अत्यजत्।

प्रातः सायम् च कलिकातायाम् विख्यातायां वैज्ञानिक समज्यायाम् स्वकीयं अनुसन्धानम् कर्तुम नित्यमेव आयातिस्म। कलिकाता विश्व विद्यालयस्य उप कुलपतिना श्री आशुतोष महाभागेन सी. वी. रमणस्य इमाम् विज्ञान संलग्नतां दृष्ट्वा विश्वविद्यालये विज्ञानाचार्य पदे अस्य नियुक्तिः कृता। इत्थं अनेन बहुकालं तत्रैव विश्वविद्यालये यापितः।

तदनन्तरं दक्षिणे बंगलौर नगरे निजं अनुसन्धानं कर्तुं प्रचक्रमे। अयम् बहूनाम् गवेषणानाम् अनुसन्धानानाम् प्रवर्तकः अभूत् विभिन्नाश्च उपाधयः प्राप्ताः। कालान्तरे विश्वविख्यातम् 'नोबेल प्राइज' इति पारितोषिकम् अपि अलभत्।

अतएव उच्यते —

विद्वत्त्वं च नृपत्वं च नैव तुल्यो कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

श्री सी. वी. रमण महोदयः, अतिसरलः, सतत अध्ययनशीलः, विनोद प्रियश्च सर्वेषाम् एव कृते स्पृहणीयः अनुकरणीयश्च।

(५०) महात्मा गाँधी

सम्पूर्णे संसारे महात्मा गाँधी महोदयस्य गणना महापुरुषेषु क्रियते। भारतवर्षे तु 'राष्ट्रपिता' 'बापू' शब्देन च व्यवहरन्ति अत्रत्याः जनाः। वस्तुतः सः महात्मा महापुरुषः आसीत्।

अस्य महापुरुषस्य जन्म सौराष्ट्र प्रान्तस्य पोरबन्दरनाम्नि नगरे वैश्य परिवारे १८६९ तमस्य ईशवीयाब्दस्य अक्तूबर मासस्य द्वितीयायां तारिकायां अभवत्। अस्य वास्तविकं नाम 'मोहनदासः' आसीत्। अस्य पितुर्नाम 'कर्मचन्द गान्धिः' आसीत्। यः राजकोट राज्यस्य अमात्यः आसीत्। अस्य बाल्यं सुखेन व्यतीतम्। अस्य प्रारम्भिकी शिक्षा गुर्जरप्रान्ते अभूत्। अस्य विवाह संस्कारः 'कस्तूरबा' नाम्न्या कन्यया सह अभवत्। अयं मैट्रिक परीक्षाम् उत्तीर्य विधि शिक्षां गृहीतुम् आङ्गलदेशम् अगच्छत्। ततः स 'बैरिस्टर' पदवीं प्राप्य भारतं प्रत्यागच्छत्। बम्बई नगरे च अधिवक्ता व्यवसायं आरभत्।

एकदा केनचित् श्रेष्ठिना अभियोगं वीक्षितुं महात्मागान्धिः दक्षिण अफ्रीकां प्रेषितः। तत्र च भारतीयानां दुर्गतिम् विलोक्य अतीव अव्यथत्। स तत्प्रतीकाराय 'सत्याग्रह' आन्दोलनं आरब्धवान्। येन महात्मागान्धिः तत्र तेषाम् अधिकारदायने सफलोऽभवत्। तत्पश्चात् स भारतं प्रत्यागच्छत्।

स अत्रागत्य भारतीयेषु गौराङ्गणाम् अत्याचारान् अपश्यत्। स अहिंसापूर्वकं सत्याग्रहान्दोलनेन तेषां विरोधं कर्तुं दृढं निश्चयं कृतवान्। स बहुवारं कारागारे अगच्छत्। जन साधारणाः अपि महात्मागान्धि महोदयाय अति सहयोगम् अयच्छन्। स्वतन्त्रता प्राप्त्यै गाँधीः महान्तं प्रयत्नम् अकरोत्। आर्थिक स्वतंत्रताम् प्राप्तुम् स्वदेशे निर्मितानाम् वस्तूनाम् प्रयोगस्य मार्गः अपि दर्शितः। समाजस्य अस्पृश्यता दोषम् उन्मूलयितुम् स अहर्निशं प्रायतत्। तेन हरिजन सेवक संघस्य अपि स्थापना कृता। स स्वदेशं सर्वोत्कृष्टं निर्मातुं सर्वदा एव प्रयत्नं कृतवान्। १९४८ तमेऽब्दे जनवरी मासस्य त्रिंशत् तिथौ 'नाथूराम गोडसे' नामकेन पुरुषेण अस्य महापुरुषस्य संहारः कृतः।

(५१)
प्रथम प्रधान मन्त्री पण्डित जवाहरलाल नेहरू

जयन्ति ते महाभागाः जन सेवा परायणाः।
जरामृत्यु भयं नास्ति, येषां कीर्ति तनोः क्वचित्॥

असारे खलु अस्मिन् संसारे बहवः मनुष्याः प्रतिदिनम् प्रादुर्भूताः भवन्ति। कोऽपि न जानति तेषाम् विषये ते के आसन्। किन्तु जन-सेवा परायणाः केचित् ईदृशाः महाभागाः भवन्ति यत् तेषाम् यशांसि पुण्य कर्माणि वा अद्यापि दृष्टिपथम् आयान्ति। तेषु महपुरुषेषु पण्डित जवाहरलाल नेहरू अद्वितीयः युगनायकः आसीत्।

अयम् महापुरूषः १८८९ तमे ख्रिष्टाब्दे नवम्बर मासस्य चतुर्दश तारिकायाम् प्रयागस्य सुसम्पन्ने काश्मीर ब्राह्मण परिवारे जन्म अलभत्। तस्य पिता पण्डित मोतीलाल नेहरू भारतवर्षस्य परम प्रसिद्धेषु विधिज्ञेषु अन्यतमः आसीत्। तस्य मातुः स्वरूप रानी इति नाम आसीत्। आङ्गल शिक्षकैः गृहे एव अस्य प्रारम्भिकी शिक्षा सम्पन्ना। १९०५ ख्रिष्टाब्दे श्री मोतीलालः शिक्षार्थं जवाहरलालम् आंगल देशम् अनयत्। तत्र च 'हैरो' नामके सुप्रसिद्धे विद्यालये तम् प्रावेशयत्। वर्ष द्वयानन्तरं कैम्ब्रिज विश्वविद्यालये स्नातक परीक्षाम् उत्तीर्य लन्दन नगरे वर्ष द्वयं स्थित्वा बैरिस्टर परीक्षायाम् उत्तीर्णः सः १९१२ तमे ख्रिष्टाब्दे सप्तवर्ष प्रवासानन्तरं स्वमातृभूमिं प्रत्यागतः।

तदनन्तरं प्रयागस्य उच्च न्यायालये पं. नेहरू विधिज्ञ वृत्तिम् आरब्धवान्। तदा अयं "स्वतन्त्रता अस्माकम् जन्म सिद्धोऽधिकारः" इति मन्त्रोद्‌घोषकस्य उग्रदलस्य नेतुः लोकमान्य बाल गंगाधर तिलकस्य विचारैः अत्यधिकम् प्रभावितः आसीत्। १९१६ तमे ख्रिष्टाब्दे कमलादेव्या सह अस्य विवाहः सम्पन्नोऽभूत्। 'रौलट एक्ट' विरोधार्थं महात्मा गाँधिनः सत्याग्रह आन्दोलने सः श्री गाँधिनः सम्पर्के आगतः। ततः प्रभृति सः भारतवर्षस्य स्वतन्त्रता प्राप्त्यै आजीवनं वृतमग्रहीत्।

१९२१ तमे ख्रिष्टाब्दे पण्डित जवाहरलाल नेहरू स्वपित्रा सह प्रथमवारं कारावासं गतः। पं. नेहरू अखिल भारतीय काँग्रेस महासभायाः १९२९ तमे ख्रिष्टाब्दे प्रथमवारं अध्यक्ष पदम् अलञ्चकार। चिकित्सार्थं स्विट्जरलैण्ड देशं गता जवाहरलालस्य धर्मपत्नी कमला देवी १९३६ तमे ख्रिष्टाब्दे तत्रैव दिवंगता।

पं. जवाहरलाल नेहरू महाभागेन स्व आयुषः भूयान् भागः कारागारेषु एव यापितः। तेन स्वकीयानि सर्वाणि पुस्तकानि कारावास काले एव लिखितानि। १९४७ तमे ईसवीये वत्सरे अगस्त मासस्य पंचदशे दिवसे स्वतन्त्रता प्राप्त्यनन्तरं

पण्डित जवाहरलाल नेहरू भारतस्य प्रथम प्रधानमन्त्रिपदम् अलंकृतवान्। आधुनिक विश्वे तेन महाभागेन भारतं सर्वोच्च स्थाने प्रतिष्ठापितम्।

यद्यपि अद्य स अस्माकम् मध्ये नास्ति परं सः स्व यशः शरीरेण अद्यापि जीवत्येव। केनचित् कविना सत्यम् उक्तम् —

विहाय सौख्यं सकलां च सम्पदाम् सदाग्रगो भारत राष्ट्र सेविनाम्।
बिनैव स्वार्थं महता श्रमेण, स्वदेश सेवाम् अकरोत् जवाहरः॥

---

(५२) राष्ट्रनायकः सुभाषचन्द्र बोसः

"कीर्तिर्यस्य स जीवति"

यावत् मृत्युलोके मनुष्यस्य कीर्तिः प्रगीयते तावत् सः जीवितः एव मन्यते। राष्ट्रभक्तः सुभाषचन्द्रः पार्थिव शरीरेण अद्य अस्माकम् मध्ये भारते यद्यपि न विराजते तथापि स यशः शरीरेण अस्माकम् मध्ये एव। अद्यापि भारतीयनाम् हृदये या निष्ठा, या श्रद्धा या भक्तिः सुभाष महाभागं प्रति वर्तते न सा दृष्टिपथं समागता कस्याप्यन्यस्य राष्ट्र नायकस्य विषये। तेन सा जन–श्रद्धा स्वोत्सर्गेण त्यागेन वा समासादिता न तु राज सुखोपभोगेन।

महाभागेनानेन सप्तनवत्युत्तराष्टादशशततमेऽब्दे (१८९७) जनवरी मासस्य त्रयोविंशति तिथौ स्वजन्मना बंगभुवम् अलंञ्चकार। अस्य तातपादाः श्री जानकी नाथ वसु महोदयाः राजकीय प्राड्विवाकाः आसन्। पितुः महत्त्वाकांक्षानुकूलं सम्पूर्ण परीक्षा पारावरं सहसैव ससम्मानम् समुत्तीर्य अनेन आई. ए. एस. परीक्षायामपि प्रथमं स्थानम् प्राप्तम्। परन्तु विदेशीय शासकानाम् भृत्यत्वं न तेन स्वीकृतम्।

सः स्वीकार्यैः उग्रविचारैः भारतवर्षस्य स्वातन्त्र्यार्थं अनेकान् भारतीयान् स्व पक्षे अकरोत्। अस्य उग्रविचारैः भयभीताः गौरांग शासकाः सुभाषम् पुनः पुनः कारागरे अक्षिपन्। १९३७ ईसवीये वर्षे त्रिपुरा काँग्रेस अधिवेशने अयम् सर्व सम्मत्या सभापतिः निर्वाचितः।

'अहिंसा मात्रेण स्वतन्त्रता प्राप्तिः असम्भवा' इति विचार्थ सः क्रान्ति पक्षम् अंगीकृतवान्। अस्य उग्रक्रान्तेः भीताः गौरांग शासकाः कलिकाता नगर्याम् पुनः इमम् कारागारे अक्षिपन्। एकदा रात्रौ सुप्तेषु कारागार-रक्षकेषु अयम् वीरः सहसा समुत्थाय सिद्धदात्रीं महामायाम् जगदम्बां संस्मृत्य मनसि प्रणम्य च कारागारत् बहिर्निगतः। वेष परिवर्तनं कृत्वा च 'पेशावर' नगरमगच्छत्। तत्र उत्तम चन्द्र नाम्नः वणिजः गृहे किंचित् कालं तस्य आतिथ्यं स्वीकृतम्। ततः 'जियाउद्दीन' इति नाम्ना जर्मन देशम् गतः।तत्र हिटलर नामकेन जर्मन शासकेन सह मैत्रीं विधाय वायुयानेन जापान देशं गतः।

मलय देशे सः स्वसंगठन चातुर्येण 'आजाद हिन्द फौज' इत्यभिधेयां सेनां संघठितवान्। 'यूयम् मह्यम् रक्तम् देहि अहम् तुभ्यम् स्वतन्त्रतां दास्यामि' इत्येषा सिंह गर्जना सुभाष मुखात् येन केनापि श्रुता सः एव सुभाषचन्द्रेण सह भारत-स्वतंत्रता संग्रामे अवतीर्णः, नारीभिः स्वकीयानि स्वर्णाभूषणानि अपि बोस महाभागस्य चरणयोः समर्पितानि।

'दिल्लीं चलत, दिल्ली नातिदूरे वर्तते' इत्येतैः शक्ति-साहस वर्धकैः उत्साहसम्पन्नैः वचनैः 'आजाद हिन्द फौज' सैनिकाः द्विगुणित उत्साहेन दिल्लीं प्रति प्रचलिताः। विधातायाः कुदृष्ट्या दुर्भाग्यवशाच्च जापान देशः पराजयतां गतः। फलतः सुभाषस्य सर्वे सैनिकाः आंगलैः बन्दीकृताः।

अस्य वीर वरेण्यस्य स्वप्नः १९४७ ईसवीये वर्षे अगस्त मासस्य पंचदश तिथौ साकारतां प्राप्तः। स्वतन्त्रे भारते सुभाषस्य अनुपस्थितिः अद्यापि दुर्भाग्य-पूर्णा।

"भारत मातुः चरणयोः समर्पितानि तस्य भौतिक सुखानि चिरस्मरणीयानि वन्दनीयानि च।"

(५३) राष्ट्रभक्तः पण्डित मदन मोहन मालवीयः

महापुरुषाणाम् यशः काये जरामरणजं भयम् क्वापि न वर्तते। यावत् मनुष्यस्य कीर्तिः मृत्यु लोके जनैः प्रगीयते तावत् यशः शरीरेण सः अस्माकम् मध्ये उपस्थितः एव। स्वकीयैः आदर्शैः गुणैः अस्माकम् चरित्रं प्रेरयति।

एतादृशानाम् महापुरुषाणाम् मध्ये मालवीय महाभागस्य नाम सूर्यः इव स्वआभाम् वितरति भारतीयानां हृदयेषु। भारतवर्षात् अज्ञानान्धकारम् दूरी कर्तुम् स्वातन्त्र्यम् अवाप्तुम् च तस्य अथक प्रयासानि सदैव स्मरणीयानि सन्ति। अस्य महाभागस्य जन्म प्रयागस्य प्रतिष्ठित ब्राह्मण परिवारे अभवत्। संस्कृतस्य मूर्धन्य विद्वान् पंडितः ब्रजनाथ मलवीयः अस्य पिता आसीत्। पं० मदन मोहनमालवीयः प्रयागस्य संस्कृत पाठशालायाम्, राजकीय विद्यालये, म्योर सेण्ट्रल महाविद्यालये च क्रमशः शिक्षां समाप्य अत्रैव राजकीय विद्यालये अध्यापकः अभवत्। मित्राणाम् परामर्शात् अयम् विधि परीक्षामपि उत्तीर्य प्रयागस्थे उच्च न्यायालये प्राड्विवाक्कर्म कर्तुम् आरभत्।

देश-सेवा-व्रत परायणः मालवीयः पंडित मोतीलाल नेहरू, लाला लाजपतराय आदिभिः राष्ट्र भक्तैः सह राष्ट्रस्य स्वतन्त्र्य युद्धे अवतीर्णः। 'रोलट एक्ट' इत्याख्यस्य विधेः विरोधे अस्य ओजस्वी भाषणं श्रुत्वा गौरांगशासकाः भयभीताः जाताः। अनेक बारं कारागरे बन्दीकृतः अपि अयम् देश-सेवानुरक्तः वीरः देशसेवा व्रतं न अत्यजत्। अखिल भारतीय कांग्रेसस्य त्रयोविंशतिमे अधिवेशने अयम् अध्यक्षपदम् अलंकृतवान्।

शिक्षया एव देशे समाजे च नवीनः प्रकाशः भविष्यति इति विचार्य श्री मालवीयः काश्याम् काशी हिन्दू विश्वविद्यालयस्य स्थापनाम् अकरोत्। अस्य निर्माणाय देशस्य धनिक वर्गः राजानश्च अस्मै प्रभूतम् धनम् प्रायच्छन्। अद्य अनेक सहस्त्र संख्यैः देश-विदेश विद्यार्थिभिः परिवृतः, विविधं विद्या पारंगतैः विद्वद्भिः उपशोभितः अयम् काशी हिन्दू विश्वविद्यालयः श्री मालवीयस्य प्रतिमूर्तिरिव शोभते।

महामना मालवीयः हिन्दी, हिन्दु, हिन्दुस्थानानाम् उत्थानाय, जीवनपर्यन्तम् अथकम् प्रयत्नम् अकरोत्।

(५४) जयजवान जय किसानोद्घोषकः श्री लालबहादुर शास्त्रिः

श्री लालबहादुर शास्त्रि महोदयस्य जन्म वाराणस्याः समीपे मुगलसराय नगरे १९०४ तमे ईशवीयाब्दे अक्तूबरमासस्य द्वितीयायां तारिकायां सामान्ये परिवारे अभवत्। कायस्थ-कुलोत्पन्नः अस्य पिता श्री शारदा प्रसादः एकस्याः पाठशालायाः अध्यापकः आसीत्। बाल्यकाले एव अस्य पिता स्वर्गगतः। अस्य माता रामदुलारी शिशुं नीत्वा काश्यां स्वपितुः गृहे प्रस्थिता। तत्रैव शिशोः पालनम् अभवत्।

अस्य आरम्भिकी शिक्षा हरिश्चन्द्र-बालविद्यालये अभवत्। बालकालादेव अयं कुशाग्रबुद्धिः, मधुरभाषी, स्वातन्त्र्यप्रियः, सच्चरित्रः चासीत्। सप्तदश वर्ष वयस्कः लालबहादुरः श्री महात्मनः गान्धिनः प्रेरितः अध्ययनं परित्यज्य असहयोग आन्दोलने सम्मिलितः। गौरांगशासकैः निगृहीतः कारागारे च क्षिप्तः। ततो मुक्तः काशी विद्यापीठे पुनरध्ययनं प्रारभत्। ततः शास्त्रिपरीक्षाम् उत्तीर्णवान्।

तस्य विवाहः श्रीमत्या ललितादेव्या सह अभवत्। १९४२ तमे अब्दे "आंग्लाः ! भारतं त्यजत्" इति आन्दोलने गौरांगशासकैः पुनः कारागारे क्षिप्तः। भारते स्वतन्त्रे जाते स नाना विभागेषु मन्त्रि पदम् लब्धवान्। १९६४ तमे अब्दे मई मासस्य सप्तविंशतितमायां तारिकायां लालबहादुरः शास्त्री भारतवर्षस्य प्रधानमन्त्री अभवत्। देशस्य च सफलं नेतृत्वं कृतवान्।

यदा भारते पाकदेशाक्रमणं अभवत् तदा श्री लाल बहादुरः शास्त्रि महोदयस्य साहसपूर्ण नीत्या भारतीयाः सैनिकाः शौर्य प्रदर्शनं कृतवन्तः। अस्मिन् युद्धे भारतीयाः विजयम् अलभन्त। ताशकन्दनगरे संधि वार्ता साफल्यानन्तरं हृदयपीडया पीड्यमानः शास्त्रिमहोदयः तत्रैव देवलोकं प्रति प्रस्थितः।

अयं सत्यनिष्ठः, परमराजनीतिज्ञः, देशभक्तः, सौम्यः कर्त्तव्यपरायणः विश्वशान्तिदूतः, कर्मठः, मधुरभाषी, धर्मभीरुः पुरुषः आसीत्। श्रद्धया मस्तकं नमति अस्य चरणयोः।

पत्र लेखन

पत्र-लेखन एक कला है जिसका सभी साहित्यों में विशिष्ट स्थान है। हमारे दैनिक जीवन में भी पत्र का अत्यधिक महत्त्व है। पत्र व्यक्ति का प्रतिनिधित्व करता है। पत्र के द्वारा ही हम सुदूर स्थित व्यक्तियों से विचार/सम्पर्क स्थापित करते हैं।

पत्र के प्रकार—मुख्यतः पत्र तीन प्रकार के होते हैं—

1. सामान्य पत्र।
2. आवेदन पत्र।
3. निमन्त्रण पत्र।

पत्र लेखन के लिए आवश्यक निर्देश—

(i) पत्र लेखन के समय लेखक का मन शान्त तथा स्थिर होना चाहिए।

(ii) सर्वप्रथम पत्रलेखक को पत्र का विषय निश्चित कर लेना चाहिए।

(iii) पत्र संक्षिप्त एवं सारगर्भित होना चाहिए। पत्र का अनावश्यक विस्तार नहीं करना चाहिए।

(iv) पत्र में अप्रासंगिक बातों एवं पुनरावृत्ति के लिए कोई स्थान नहीं होता है।

(v) पत्र की भाषा सरल, स्पष्ट, स्वाभाविक एवं अभिव्यक्ति पूर्ण होनी चाहिए।

(vi) पत्र की शैली ललित एवं मधुर शब्दावलि से युक्त होनी चाहिये।

सामान्य पत्र—

सामान्य पत्र के प्रारम्भ में अपने से बड़ों के लिए 'सादरं प्रणामाः', 'प्रणतयः', बराबर वालों के लिए 'सस्नेह नमस्ते'; 'नमस्कार': तथा छोटों के लिए 'शुभाशिषः', 'स्वस्ति' 'शुभाशीः' 'शुभाशीर्वादं' आदि शब्दों का प्रयोग करना चाहिए।

(vii) सामान्य पत्र के अन्त में अपने से बड़ों के लिए 'भवतामाज्ञाकारी' 'कृपाकांक्षी', 'भवतां अनुचरः', बराबर वालों के लिए 'भवदीयं', 'भावात्कः' तथा छोटों के लिए 'शुभेच्छु'; 'शुभचिन्तकः' 'शुभाकांक्षी' आदि शब्दों का प्रयोग करना चाहिए।

आवेदन-पत्र—

(viii) आवेदन पत्र/प्रार्थनापत्र में सर्वप्रथम बायीं ओर 'प्रतिष्ठासु' 'सेवासु' अथवा 'सेवायाम्' लिखना चाहिए। इसके बाद अधिकारी का पदनाम, संस्था अथवा कार्यालय का नाम तथा पूर्ण पता लिखना चाहिए। उसके नीचे बायीं ओर 'महोदया:' 'श्रीमन्त:' आदि लिखना चाहिए। पत्र के अन्त में 'भवदीय'/'भवदीया' अथवा 'प्रार्थी'/'प्रार्थिनी' लिखकर अपना पूरा पता लिखना चाहिए। पते के बायीं ओर आवेदन करने की तिथि लिखी जानी चाहिए।

निमन्त्रण पत्र

(ix) निमन्त्रण पत्र के प्रारम्भ में केवल 'महोदय'/'महोदया' अथवा 'श्रीमान्'/'श्रीमन्त:' लिखा जाना चाहिए।

(x) निमन्त्रण पत्र के अन्त में 'दर्शनाभिलाषी', 'निवेदक:' आदि लिखना चाहिए।

पिता को पत्र

वाराणसीत:

4.10.91

प्रात: स्मरणीया; पितृपादा:

सादरं प्रणामा:।

अहं कुशली। भवतां कुशलतायै भगवन्तं प्रार्थये। अद्यैव भवदीयं पत्रं लब्धम्। अत्र मम अध्ययनं सुचारूरूपेण भवति। अस्माकं वार्षिकी परीक्षा मई मासे समाप्ता भविष्यति। परीक्षानन्तरं ग्रीष्मावकाशे आगन्तुम् इच्छामि। सम्प्रति द्रव्यस्य आवश्यकता वर्तते। अत: भवान् द्विशतानि रूप्यकाणि प्रेषयितुम् अनुकम्पताम्।

सम्मान्याया: मातुश्चरणयो: मम प्रणाम:।अनुजाय च आशिष:। अन्यत् शेषं कुशलं।

कृपापत्रम् अवश्यं शीघ्रं च प्रेषणीयम्।

श्रीमतां पुत्र:

मयंक:

237, बिरलाछात्रावास:

काशी हिन्दू विश्वविद्यालय:,

वाराणसी

पुत्र को पत्र

आगरातः
16.10.91

प्रिय पुत्रः,
स्वस्ति ।

अद्य प्रातः एव त्वदीयं पत्रम् आगतम् । वृत्तं च ज्ञातम् । अत्र सर्वे जनाः सकुशलाः सन्ति । अहं धनादेश पत्रेण द्विशतनि रुप्यकाणि प्रेषयामि । धनादेश प्राप्ते सति अवश्यं सूचना देया ।

अध्ययन विषये सावधानेन भवितव्यम् । अहम् अत्यावश्यक कार्यवशात् मई मासे वाराणसी नगरं आगमिष्यामि । स्वमित्रेभ्यः मदीयः आशीर्वादः प्रदेयः ।

पत्रोत्तरं शीघ्रं देयम् ।

तव शुभाकाङ्क्षी
ईश्वर चन्द्रः

मित्र को पत्र

मुम्बईतः
दिनाङ्कः 16.11.86

प्रिय सुहृद्वर !
सप्रेम नमस्कारः ।

अहं सकुशलः तवापि कुशलं वाञ्छामि । बहूनि दिनानि व्यतीतानि भवदीयम् एकमपि पत्रम् अत्र न आगतम् । तेन मनसि चिन्ता वर्तते ।

अहम् अत्र अधुना छात्रावासे निवसामि । अद्यैव ग्रामात् पितुः पत्रं आगतम् । तत्र अपि कुटुम्बस्य सर्वे जनाः स्वस्थाः, सकुशलाः च सन्ति । अस्माकं अर्द्धवार्षिकी परीक्षा जनवरी मासे समाप्ता भविष्यति । त्वं कदा अत्र आगमिष्यसि ? भवदीयं स्वास्थ्यं कीदृशं वर्तते ?

एतत्सर्वं सविस्तारं सूचनीयम् ।

पत्रस्य प्रतीक्षायाम्

तव सुहृत्
रामदत्तः

मित्र को पत्र

लखनऊत:
दिनांङ्क: 25 नवम्बर 89

प्रियमित्र गुरुदत्त:

सस्नेहं नमस्कार: ।

अत्र कुशलं तत्रास्तु ।

अद्यैव भवदीयं कुशल पत्रं हस्तगतं । भवत्पत्रं सम्प्राप्य मम हृदय: अतीव प्रसन्नताम् अनुभवति । अध्ययनव्यस्त: अहं पत्रं प्रेषितुं न क्षम: संजात: ।

अद्यैव मम अर्द्धवार्षिकी परीक्षा-परिणाम: समागत: । अहं द्वयशीति: प्रतिशतम् अंकान् लब्ध्वा सफल: अभवम् । गृहे अपि सर्वे जना: कुशला:, स्वास्था: च सन्ति । मम स्वास्थ्यमपि सुन्दरं वर्तते । शेषं कुशलम् ।

मातृभ्य: मम सादरं प्रणामा: भ्रातृश्च मधुर स्मरणम् ।

पत्रोत्तरं शीघ्रं देयम् ।

भवतां एव
लक्ष्मीचन्द:

मित्र को पत्र

जयपुरत:
8.12.89

प्रिय सुहृद्वर !

नमस्कार: ।

अद्य भवदीयं 25 नवम्बर, 89 दिनांकांकिन्तं पत्रं लब्धम् । पठित्वा च मम मनसि अतीव आनन्द: अभूत् । भवान् अर्द्धवार्षिक परीक्षायाम् द्वयशीति: प्रतिशतम् अंकान् लब्ध्वा स्वकक्षायां प्रथमं स्थानं अलभत । एतत् वृत्तम पठित्वा महान् हर्षो सञ्जात: । अस्मिन् शुभावसरे हार्दिकानि साधुवचनानि । ग्रीष्मावकाशे भवान् कुत्र गन्तुमिच्छसि ?

भवदीय दर्शनस्य महती उत्कण्ठा वर्तते । भवद्भि: अत्र अवश्यम् आगन्तव्यम् । शेषं कुशलम् ।

भवत: मातु: चरणयो: मम प्रणाम: । अनुजेभ्य: च स्नेहपूर्ण: शुभाशीर्वाद: ।

पत्रोत्तरं शीघ्रं देयम् ।

भवतां एव—
गुरुदत्त:

अवकाश के लिए प्रार्थना पत्र

प्रतिष्ठायाम्,

श्रीमान् प्रधानाचार्य महोदयाः
राजकीय इण्टर कालेज,
मेरठ

महोदयाः !

सविनयं निवेद्यते यत् अहं साम्प्रतं ज्वरेण पीडितोऽस्मि। येन अहं विद्यालयं आगन्तुम् न शक्नोमि।

अतः भवान् दिनद्वयस्य अवकाशं दत्त्वा अनुगृह्णातु।एतदर्थम् अहं भवतः सदैव अनुगृहीतो भविष्यामि।

भवताम् आज्ञाकारी शिष्यः
तरुण गोयलः
द्वादश कक्षास्थः

दिनाङ्कः 21.11.89

अवकाश के लिए प्रार्थना पत्र

सेवायाम्

श्रीमान् प्रधानाचार्य महोदयाः
क्वीन्स कालेज
वाराणसी

श्रीमन् !

सादरम् इदं निवेदनम् अस्ति यत् मम भ्रातुः विवाहः संस्कारः मयराष्ट्र नगरे सम्पन्नः भविष्यति। वरयात्रायां मम उपस्थिति अनिवार्या अस्ति। तेन अहं विद्यालयम् आगन्तुं समर्थो न अस्मि।

अतः अहं भवन्तं प्रार्थयामि यत् दिनत्रयस्य अवकाशं स्वीकृत्य माम् अनुग्रह्णातु।

कृपा दृष्टये कृतज्ञोऽस्मि।

भवतां शिष्यः
विष्णुदत्तः
द्वादश कक्षास्थः

दिनांकः 18.10.86

अवकाश के लिए प्रार्थना पत्र

सेवायाम्,

श्रीमान् प्रधानाचार्य महोदया:
पी० पी० एन० इण्टर कालेज,
कानपुर

महोदया:,

सविनयं इदं निवेदनम् अस्ति यत् अद्य अहं स्वपित्रा सह मवाना नगरं गमिष्यामि। तेन अहं विद्यालये उपस्थातुम् असमर्थो अस्मि।

अत: अद्य प्रभृति दिनत्रयस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति भवन्त इति।

भवताम् आज्ञाकारी शिष्य:
वेदपाल: त्यागी:
एकादश कक्षास्थ:

दिनांक: 15.10.91

शुल्क मुक्ति हेतु प्रार्थना पत्र

सेवायाम्,

श्रीमान् प्रधानाचार्य महोदया:
रामधारी सिंह इण्टर कालेज
पटना

महोदया:,

सविनयम् इदं निवेदनम् अस्ति यत् अहं भवतां विद्यालये एकादश कक्षायां पठामि। अहं ग्रामीण: छात्र: अस्मि। मम् पितु: आर्थिकी स्थिति: दयनीया अस्ति। येन अहं विद्यालयस्य मासिक शुल्कं दातुम् समर्थ: न अस्मि।

अत: शुल्क-मुक्ति-प्रदानाय अहं प्रार्थये। आशासे भवान् मम प्रार्थनां स्वीकृत्य अकिंचनं माम् अनुग्रहीष्यति।

भवतां चरणचञ्चरीक:
रामचन्द्र: आर्य:
एकादश कक्षास्थ

दिनांक: 3.7.87

पुस्तक मंगाने हेतु प्रार्थना पत्र

प्रतिष्ठायाम्,

श्रीमान् प्रकाशकः महोदयः
राजहंस प्रकाशन मन्दिरम्,
धर्म-आलोकः, रामनगरः
मेरठ (उत्तर प्रदेश)

श्रीमान्

भवता प्रकाशितं "राजहंस संस्कृत निबन्धः" नामकम् पुस्तकं दृष्टम्। इदं पुस्तकं अखिल भारतीय विद्यार्थिनां कृते संस्कृत ज्ञानवर्धकम्, सरल संस्कृते लिखितम् अतीव लाभप्रदं वर्तते।

अतः तस्याः विंशति प्रतयः शीघ्रं एव वी० पी० पी० माध्यमेन निम्नांकित संकेत स्थाने प्रेषयित्वा भवान् माम् अनुगृह्णातु।

भवदीय—
रामकृष्णः यादवः
भारती प्रकाशनः
राष्ट्रपति राजेन्द्र प्रसाद मार्गः
पटना (बिहार)

दिनांक : 12.12.92

निमन्त्रणपत्रम्
(भाई के विवाह के शुभावसर पर)

दिनांकः 18.1.93

श्रीमन्तः ....महोदयाः !

भवन्तः एतद् ज्ञात्वा प्रसन्नाः भविष्यन्ति यत् ईश्वरकृपया मम भ्रातुः देवदत्तस्य विवाह संस्कारः मयराष्ट्रवास्तव्यस्य श्री रमेशचन्द्र शर्मणः कन्यया कमलादेव्या सह फरवरी मासस्य द्वादश दिनांके सम्पत्स्यते। वरयात्रा च प्रातः सप्तवादन समये मोटरयानेन प्रस्थायते।

अस्मिन् अवसरे भवान् सपरिवारं समागत्य शुभाशीर्वचोभिः वरवधूः समाजयन्तु इति।

दर्शनाभिलाषी—
यज्ञदत्त भारद्वाजः
7/56, रामनगर मार्गः
मुरादाबाद

निमन्त्रणपत्रम्

(पुत्र के यज्ञोपवीत संस्कार के अवसर पर)

माननीयाः महोदयाः।

एतद् विज्ञाय भवान् प्रसन्नः भविष्यति यत् परमेश्वरस्य अनुकम्पया मम पुत्रस्य चिरंजीवस्य मनुजस्य यज्ञोपवीतसंस्कारः निम्नलिखित कार्यक्रमानुसारं संपादयिष्यते। सपरिवारं भवताम् उपस्थितिः अपेक्षिता वर्तते। अतः श्रीमन्तः समागत्य चिरंजीविने आशिषं यच्छन्तु।

कार्य-क्रमः

तिथौ	वादने	कार्यम्
१८.२.९२	प्रातः सप्तवादने	मंगलाचरणम् पूजारम्भश्च
१९.२.९२	प्रातः अष्टवादने	यज्ञारम्भः
	प्रातः नववादने	यज्ञोपवीत धारणम्
	प्रातः दशवादने	आगतेभ्यः आशीर्वचांसि
	मध्याह्ने द्वादशवादने	प्रीतिभोजः
	मध्याह्ने त्रयवादने	नारीसंगीतम्
	अपराह्ने पंचवादने	चायपानम् विसर्जनम् च।

317, विजयनगर कालोनी
गाजियाबाद

भवतां दर्शनेच्छुकः

दिनांकः 2.2.92 आलोकः
शास्त्री

विभिन्नेषु निबन्धेषु प्रयुक्त-योग्यानि सुभाषित रत्नानि

परोक्षे कार्य हन्तारं, प्रत्यक्षे प्रियवादिनम् (मित्रता)
वर्जयेत् तादृशं मित्रं, विषकुम्भम् पयोमुखम् ॥१॥

भावार्थ—सामने मीठे बोलने वाला और पीछे काम बिगाड़ने वाला मित्र उसी प्रकार है जिस प्रकार जहर से भरे हुए घड़े के मुँह पर दूध लग रहा हो। ऐसे मित्र को छोड़ देना चाहिए।

उदेति सविता ताम्रः ताम्र एवास्तमेति च। (महापुरुष)
सम्पत्तौ च विपत्तौ च महताम् एकरूपता ॥२॥

भावार्थ—सूर्य जब उदय होता है तब भी ताँबे के रंग का होता है और जब अस्त होता है तब भी ताँबे के रंग का होता है। इसी प्रकार महापुरुष सम्पत्ति और विपत्ति में एक समान रहते हैं।

विद्या विवादाय धनम् मदाय, (सज्जन)
शक्तिः परेषाम् परिपीडनाय।
खलस्य साधोः विपरीतमेतत्
ज्ञानाय, दानाय च रक्षणाय ॥३॥

भावार्थ—दुष्ट और सज्जन में यही अन्तर होता है कि दुष्ट की विद्या झगड़े के लिय धन घमण्ड के लिए और ताकत दूसरों को कष्ट पहुँचाने के लिये, होती है जबकि सज्जन की विद्या ज्ञान के लिये, धन दान के लिए और शक्ति दूसरों की रक्षा के लिए होती है।

सहसा विदधीत न क्रियाम्, (विचार)
अविवेकः परमापदाम् पदम्।
वृणुते हि विमृश्यकारिणं,
गुणलुब्धाः स्वयमेव सम्पदः ॥४॥

भावार्थ—एक दम बिना विचारे कोई काम नहीं करना चाहिये। बिना सोचे समझे कोई काम करना आपत्तियों का घर होता है। विचारवान् पुरुष के पास गुणों पर मोहित होने वाली लक्ष्मी स्वयम् ही निवास करने के लिये आती है।

वज्रादपि कठोराणि मृदूनि कुसुमादपि। (महापुरुष)
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ॥५॥

भावार्थ—महापुरुषों के हृदय को कोई नहीं जान सकता, वे कभी वज्र से भी अधिक कठोर हो जाते हैं। कभी-कभी फूलों से भी अधिक कोमल हो जाते हैं।

प्रीणाति यः सुचरितैः पितरम् स पुत्रः (सुखी)
यद् भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रम् आपदि सुखे च समक्रियं यत्
एतत्त्रयं जगति पुण्य कृतो लभन्ते ॥६॥

भावार्थ— जो पुत्र अपने अच्छे आचरणों से पिता को प्रसन्न रखता हो, जो स्त्री अपने पति का ही कल्याण चहती हो, जो मित्र सुख-दुख में मित्र के प्रति एक सा रहता हो, इन तीनों चीजों को पुण्यवान् लोग ही प्राप्त कर पाते हैं।

व्यतिजिषति पदार्थान् अन्तरः कोऽपि हेतुः (प्रेम)
न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।
विकसति हि पतंगस्योदये पुण्डरीकम्,
द्रवति च हिमरश्मौ उद्गते चन्द्रकान्तः ॥७॥

भावार्थ—पारस्परिक प्रेम संसार की किसी बाहरी वस्तु पर आधारित नहीं होते। पूर्वजन्म के संस्कार ही इनको आपस में मिलाते हैं। देखिये, सूर्य के उदय होने पर कमल खिल जाते हैं जबकि इन्हें सूर्य की किरणों से झुलस जाना चाहिये। चन्द्रमा के निकलने पर चन्द्रकान्तमणि पिघलने लगती है जबकि चन्द्रमा की किरणों में ऊष्मा होती ही नहीं। इसलिये ये सब स्नेह पूर्वजन्म के कारणों पर आधारित होते हैं।

निन्दन्तु नीति निपुणाः यदि वा स्तुवन्तु, (धैर्य)
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥८॥

भावार्थ—नीति में निपुण लोग चाहे निन्दा करें या प्रशंसा करें, लक्ष्मी चाहे आवे या चली जाये, आज ही मृत्यु हो जाये या सौ वर्ष बाद हो परन्तु धैर्यशाली पुरुष न्याय के मार्ग से विचलित नहीं होते।

न चौरहार्यं न च राजहार्यं, (विद्या)
न भ्रातृभाज्यं न च भारकारि।

व्यये कृते वर्धते एव नित्यं।
विद्याधनम् सर्वधन-प्रधानम् ॥९॥

भावार्थ— विद्या रूपी धन सब धनों में श्रेष्ठ है क्योंकि न इसे चोर चुरा सकता है न राजा ले सकता है न कोई बाँट सकता है न इसका कोई बोझ उठाना पड़ता है। विशेषता यह है कि खर्च करने पर और ज्यादा बढ़ती है।

काव्य शास्त्र विनोदेन कालो गच्छति धीमताम्।　(समय का सदुपयोग)
व्यसनेन च मूर्खाणाम् निद्रया कलहेन वा ॥१०॥

भावार्थ—बुद्धिमान् मनुष्यों का समय अच्छे-अच्छे ग्रन्थ पढ़ने में बीतता है, मूर्खों का समय किसी बुरी आदत में, सोने में या आपस में लड़ने में बीतता है। मूर्ख और बुद्धिमान् में यही अन्तर हैं।

जल बिन्दु निपातेन क्रमशः पूर्यते घटः। (समय का सदुपयोग)
स हेतुः सर्व विद्यानाम्, धर्मस्य धनस्य च॥ ११ ॥

भावार्थ—घड़े में एक-एक बूँद गिरने से घड़ा भर जाता है। यही नियम विद्या ग्रहण करने, धर्म करने और धन इकट्ठा करने में लागू होता है। थोड़ा-थोड़ा इकट्ठा करने से धन भी जुड़ता है, धर्म और विद्या भी।

सुखार्थिनो　कुतो　विद्या,　(विद्यार्थी जीवन)
विद्यार्थिनः　कुतः　सुखम्।
सुखार्थी वा त्यजेत् विद्याम्,
विद्यार्थी वा त्यजेत् सुखम् ॥१२ ॥

भावार्थ—सुख चाहने वालो को विद्या नहीं मिलती और विद्या चाहने वालो को सुख नहीं मिलता। इसलिये सुखार्थी विद्या को छोड़ दे और विद्यार्थी सुख को छोड़ दे।

प्रत्यासन्नेऽपि मरणे रक्षोपायो विधीयते　(उद्योग)
उपाये सफले रक्षा, निष्फले नाधिकं मृतेः॥ १३॥

भावार्थ—मृत्यु निकट आ जाने पर भी उससे बचने का उपाय करते रहना चाहिये क्योंकि यदि उपाय सफल हो गया तो रक्षा हो ही जायेगी और यदि उपाय सफल नहीं हुआ तो मृत्यु से अधिक और क्या हो सकता है।

व्याधिना पीड्यमानोऽपि मार्यमाणोऽपि भुभुजा,　(उपाय)
प्रत्यायाति यमद्वारात् प्रतीकार परो नरः॥ १४॥

भावार्थ—जो व्यक्ति उपाय करता रहता है वह रोगों से पीड़ित होने पर राजा से ताड़ित होने पर यहाँ तक कि मौत आने पर भी अपने को बचा लेता है।

मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा (दया)
दरिद्रे दीयते दानम् सफलम् पाण्डुनन्दन॥ १५ ॥

भावार्थ—हे अर्जुन रेगिस्तान में जैसे वर्षा कल्याणकारी होती है वैसे ही भूखे को दिया गया भोजन और दरिद्र को दिया गया दान सफल होता है।

दरिद्रान् भर कौन्तेय, मा प्रयच्छेश्वरे धनम् (दया)
व्याधितस्य औषधं पथ्यं, नीरुजस्य किम् औषधैः॥ १६ ॥

भावार्थ—हे अर्जुन! दरिद्रों को दान दो, धनवान को देने से क्या लाभ। बीमार को दवा देना हितकारी है जो स्वस्थ है उसका दवा से क्या मतलब।

मातृवत् पर दारेषु पर द्रव्येषु लोष्ठवत्। (सदाचार)
आत्मवत् सर्वभूतेषु, यः पश्यति सः पण्डितः॥ १७॥

भावार्थ—दूसरे की स्त्री को माता के समान, दूसरे के धन को मिट्टी के ढेर के समान और अपने के ही समान जो सब प्राणियों को देखता है वही विद्वान् होता है।

सर्वनाशे समुत्पन्ने अर्धम् त्यजति पण्डितः। (विनाश से बचना)
अर्धेन कुरुते कार्यम्, सर्वनाशो हि दुस्सहः ॥ १८ ॥

भावार्थ—बुद्धिमान् लोग सर्वनाश की स्थिति में आधा तो स्वयम् ही छोड़ देते है और आधे से अपना काम चलाते हैं क्योंकि सर्वनाश तो असहनीय होता है।

जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च। (शोक हीनता)
तस्मात् अपरिहार्येऽर्थे न त्वम् शोचितुमर्हति॥ १९ ॥

भावार्थ—जो पैदा हुआ है उसकी मृत्यु निश्चित है और जो मर गया उसका जन्म निश्चित है इसलिये हे अर्जुन इस अवश्यम्भावी विषय में तुम्हें शोक नहीं करना चाहिये।

वासांसि जीर्णानि यथा विहाय (आत्मा की अमरता)
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णानि
अन्यानि संयाति नवानि देही॥ २० ॥

भावार्थ—जिस प्रकार पुराने कपड़ों को छोड़कर मनुष्य दूसरे नये कपड़ों को पहिन लेता है। उसी प्रकार मनुष्य जीण-शीर्ण पुरारे शरीर को छोड़ कर आत्मा नये शरीर को धारण करती है।

ये नास्तिकाः निष्क्रियाश्च गुरु शास्त्रातिलंघिनः। (दुराचार)
अधर्मज्ञाः दुराचाराः ते भवन्ति गतायुषः॥ २१॥

भावार्थ—जो ईश्वर को नहीं मानते, अकर्मण्य हैं, गुरु और शास्त्रों के आदेशों का उल्लंघन करते हैं अधार्मिक हैं, दुराचारी हैं वे अल्पजीवी होते है।

अभिवादन शीलस्य नित्यं वृद्धपसेविनः। (सदाचार)
चत्वारि तस्य वर्धन्ते आयु विद्या यशोबलम्॥२२॥

भावार्थ—जो अपने बड़ों को नित्य अभिवादन करता है उसकी आयु, विद्या, यश और बल ये चार चीजें स्वतः ही बढ़ती हैं।

वृत्तं यत्नेन संरक्षेत् वित्तमायाति याति च। (सदाचार)
अक्षीणो वित्ततः क्षीणो, वृत्तस्तु हतो हतः॥ २३॥

भावार्थ—धन तो आता है और चला जाता है इसलिये मनुष्य को अपने चरित्र की यत्नपूर्वक रक्षा करनी चाहिये। क्योंकि धन से क्षीण व्यक्ति क्षीण नहीं कहा जाता परन्तु चरित्र से हीन व्यक्ति तो मरे हुए जैसा ही होता है।

सत्येन रक्ष्यते धर्मः विद्या योगेन रक्ष्यते। (सदाचार)
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते॥ २४॥

भावार्थ—सत्य से धर्म की, योग से विद्या की शुद्धता से रूप की और अच्छे आचरण से कुल की रक्षा होती है।

जयन्ति ते महाभागाः जन-सेवा-परायाणाः (राष्ट्र भक्त)
जरा-मृत्यु भयं नास्ति, येषां कीर्तितनोः क्वचित॥ २५॥

भावार्थ—जन-सेवा में लगे हुए उन महापुरुषों की जय हो। उनके कीर्ति रूपी शरीर में कभी न बुढ़ापे का भय रहता है और न मृत्यु का भय रहता है।

जयन्ति ते सुकृतिनः रस सिद्धाः कवीश्वराः। (कवि)
नास्ति येषां यशःकाये जरा-मरणजं भयम्॥ २६॥

भावार्थ—रस सिद्ध, शुभ कर्मी महाकवियों की जय हो जिनके यशरूपी शरीर में न वृद्धावस्था का भय है और न मत्यु का।

चक्षुषा, मनसा, वाचा, कर्मणा च चतुर्विधम् (प्रसन्नता)
प्रसादयति यो लोकं, तं लोको नु प्रसीदति॥ २७॥

भावार्थ—नेत्रों से, मन से, वाणी से, कर्म से, इन चारों प्रकार से जो संसार को प्रसन्नता प्रदान करता है संसार उसको प्रसन्न करता है।

अक्रोधेन जयेत् क्रोधं, असाधुं साधुना जयेत्। (शुभ आचरण)

जयेत् कदर्यम् दानेन, जयेत् सत्येन चानृतम्॥ २८॥

भावार्थ—शान्ति से क्रोध को, सज्जनता से दुष्टता को, दान से कृपणता को और सत्य से झूठ को जीत लेना चाहिए।

मनीषिणः सन्ति न ते हितैषिणः, (विवेक)

हितैषिणः सन्ति न ते मनीषिणः।

सुहृच्च विद्वानाणि दुर्लभो नृणाम्,

यथौषधं स्वादु हितं च दुर्लभम्॥ २९॥

भावार्थ—जो विद्वान हैं वे हितैषी नहीं हैं। जो विद्वान भी हो और मित्र भी हो ऐसे विद्वान दुर्लभ होते हैं। जैसे स्वादिष्ट औषधि का हितकारी होना दुर्लभ होता है।

यः पठति, लिखति, पश्यति (ज्ञान का साधन)

परिपृच्छति, पण्डितान् उपाश्रयति।

तस्य दिवाकर किरणैः,

नलिनी दलमिव विकास्यते बुद्धिः। ३० ॥

भावार्थ—जो पढ़ता, लिखता है, देखता है विद्वानों जो पूँछ कर अपनी जिज्ञासा शान्त करता है। विद्वानों के सम्पर्क में रहता है। ठसकी बुद्धि उसी प्रकार विकसित हो जाती है जिस प्रकार सूर्य की किरणों से कमल खिल जाते हैं।

मनसि वचसि काये पुण्य पीयूष पूर्णाः (श्रेष्ठ जन)

त्रिभुवनम् उपकार श्रेणिभिः प्रीणयन्तः।

पर गुण परमाणून् पर्वतीकृत्य नित्यं

निज हृदि विकसन्तः सन्ति सन्तः कियन्तः॥ ३१॥

भावार्थ—पुण्य और अमृत से भरे हुए मन वाणी और कर्म से तीनों लोगों को अपने उपकार से प्रसन्न करने वाले तथा दूसरे के छोटे से छोटे गुण को पर्वत के समान बताकर प्रगट करने वाले सज्जन लोग इस संसार में कितने हैं ?

न वै ताडनात्, तापनात् बह्नि मध्ये (विद्वान का अनादर)

न वै विक्रयात् क्लिश्यमानोऽहमस्मि।

सुवर्णस्य में मुख्य दुःखं तदेकं
यतो मां जनाः गुञ्जया तोलयन्ति ॥ ३२ ॥

भावार्थ—स्वर्ण कहता है कि मुझे आपे पीटने, आग में तपाने, बेचने आदि का दुःख नहीं है बल्कि इसका दुख है कि लोग मुझे गुज्जा (चौहटनी) से तोलते हैं (तुलना करते हैं)

रात्रिर्गमिष्यति भविष्यति सुप्रभातम् (अनुद्यमी)
भास्वानुदेष्यति हसिष्यति पंकज श्रीः।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त! हन्त! नलिनीं गज उज्जहार ॥३३॥

भावार्थ—रात बीतेगी, प्रभात होगा, सूर्य उदय होगा, कमल खिलेंगे। कमल के भीतर बंद भौंरा यही सोचत रहता है इतने में हाथी आकर उसे कुचल देता है। यदि भौंरा इससे पहिले शायद उसमें से निकलने का प्रयास करता तो शायद निकल आता।

रे रे चातक !सावधान मनसा मित्र ! क्षणं श्रूयताम्। (सभी दयालु नहीं होते)
अम्भोदाः बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिः आर्द्रयन्ति धरिणीं गर्जन्ति केचित् वृथाः
यं यं पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः ॥ ३४ ॥

भावार्थ—सभी के सामने दाँत निकाल कर गिड़गिड़ाना नही चाहिये। चातक के माध्यम से कवि समझाता है कि आकाश में बहुत से बादल रहते हैं कुछ बरसने वाले होते है कुछ बेकार ही गरजते हैं। सभी के सामने दीन वचन कहना अच्छा नहीं होता।

कोकिल यापय दिवसान् तावद् विरसान् करील विटपेषु। (आशा)
यावत् मिलदलिमालः कोऽपि रसालः समुल्लसति ॥ ३५ ॥

भावार्थ—जब तक आम के वृक्ष पर बौर आये और उस पर गूँजने लगें तब तक हे कोयल। करील के काँटेदार पेड़ पर अपना समय किसी तरह बिता लो।

मुहूर्तं ज्वलितं श्रेयो न च धूमायितं चिरम्। (वीरता)
मा स्म कस्यचित् गेहेऽजनि राज्ञो मृदुः खरः ॥ ३६ ॥

भावार्थ—एक क्षण के लिये जलकर प्रकाश फैला देना श्रेयस्कर है न कि सौ साल तक धुँआ देते रहना अर्थात् निर्जीव होकर जीवित रहना। इसलिये किसी के घर में काई गदहा पैदा नहीं होना चाहिए।

यस्य वृत्तं न जल्पन्ति मानवाः महदद्‌भुतम्। (आचरण)

राशिवर्धन मात्रं स नैव स्त्री न पुनः पुमान्॥ ३७॥

भावार्थ—जिसके अद्‌भुत चरित्र की महापुरुष प्रशंसा नहीं करते वह केवल अन्न का पात्र माना है न वह स्त्री होता है और न पुरुष।

निरमर्षं, निरुत्साहं, निर्वीयम्, अरिनन्दनम् (अशक्त)

मा स्म सीमन्तनी काचित् जनयेत् पुत्रमीदृशम्॥ ३८॥

भावार्थ—क्रोध, उत्साह और शक्ति से हीन पुत्र को कोई स्त्री पैदा न करें क्योंकि वह शत्रु का प्रिय हो जाता है।

दाने, तपसि, शौर्ये च विज्ञाने, विनये नये। (मातृभूमि)

विस्मयो न च कर्तव्यो बहुरत्ना वसुन्धरा॥ ४९॥

भावार्थ—यदि कोई व्यक्ति दान दें, तप में, पराक्रम में, विज्ञान में और नीति में बढ़ा चढ़ा है तो आश्चर्य नहीं करना चाहिये क्योंकि इस धरती माता में तो बहुत से रत्न पैदा होते हैं।

उत्साह सम्पन्नमदीर्घ सूत्रम् (कर्त्तव्यशील)

क्रिया विधिज्ञं व्यसनेषु असक्तम्।

शूरं कृतज्ञं दृढ़ सौहृदं च

लक्ष्मीः स्वयम् याति निवास हेतोः॥ ४०॥

भावार्थ—उत्साह से मुक्त, आलस्य रहित, काम करने के ढंग को जानने वाला, व्यसनों से दूर रहने वाला, वीर एहसान को मानने वाले, पक्की मित्रता वाले के पास लक्ष्मी स्वयं ही रहने के लिये आती है।

गुरु शुश्रूषया विद्या पुष्कलेन धनेन वा (विद्या)

अथवा विद्यया विद्या चतुर्थो नैव लभ्यते॥ ४१॥

भावार्थ—विद्या केवल गुरु की सेवा से, अत्यधिक धन देने से, या विद्या के बदले विद्या देने से ही प्राप्त होती है। विद्या प्राप्त करने का चौथा मार्ग है ही नहीं।

यो नात्मजे न च गुरौ न च भृत्य वर्गे (मानव जीवन का उद्देश्य)

दीने दयां न कुरुते न च बन्धुवर्गे

किं तस्य जीवित फलेन मनुष्य लोके।

काकोऽपि जीवति चिरम् बलिं च भुङ्क्ते॥ ४२॥

भावार्थ—जो अपने पुत्र पर, गुरु पर, नौकरों पर, दीन व्यक्ति पर, भाइयों पर दया नहीं करता उसके संसार में जीवित रहने से क्या लाभ।

वैसे तो कौआ भी बहुत दिन जीवित रहता है और बलि खाता है

व्रजन्ति ते मूढ़ धियः पराभवं (दुष्ट के साथ दुष्टता)
भवन्ति मायाविषु ये न मायिनः
प्रविश्य हि घ्नन्ति शठाः तथा विधान्
असंवृताङ्गान् निशिताःइवेषवः ॥ ४३ ॥

भावार्थ—जो दुष्टों के साथ दुष्ट नहीं बनता वह मूर्ख बुद्धि वाला सदैव हार का मुख देखता है। नंगे शरीर में घुसे हुए बाण की तरह वह सदैव कष्ट और कसक पैदा करता रहता है।

अवन्ध्य कोपस्य विहन्तुरापदाम् (समय पर क्रोध भी उचित)
भवन्ति वश्याः स्वयमेव देहिनः।
अमर्ष शून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥४४॥

भावार्थ—जिसका क्रोध व्यर्थ नहीं जाता उस व्यक्ति की आपत्तियों को दूर करने के लिये लोग स्वयं ही उपस्थित हो जाते हैं। क्रोध रहित व्यक्ति से विद्वानों का न आदर ही होता है न शत्रुओं को ही भय होता है।

यस्मिन् यथा वर्तते यो मनुष्यः, (जैसे को तैसा)
तस्मिन् तथा वर्तितव्यं स धर्मः
मायाचारो मायया वर्तितव्यः
साध्वाचारो साधुना प्रत्युपेयः ।४५॥

भावार्थ—जो मनुष्य जिसके साथ जैसा व्यवहार करता है उसके साथ वैसा ही व्यवहार करना चाहिये। ठगों के साथ ठगों का सा और सज्जनों के साथ सज्जनों का सा व्यवहार करना चाहिये।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन (कर्म के प्रति निष्ठा)
मा कर्मफल हेतुर्भूः मा ते संगोस्त्वकर्माणि ।।४६ ॥

भावार्थ—मनुष्य का कर्म करने का ही अधिकार है फल प्राप्ति में उसका कोई अधिकार नहीं है। इसलिये मनुष्य को न कर्म हीन होना चाहिये। और न कर्म की फल प्राप्ति में लिप्त होना चाहिये।

यं माता पितरौ क्लेशं सहेते सम्भवे नृणाम् (माता-पिता पूज्य)
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ।।४७॥

भावार्थ—मनुष्य के पैदा होने में माता-पिता जो कष्ट सहते हैं उनसे मनुष्य सैकड़ों वर्षों तक उर्ऋण नहीं हो सकता।

एतद्देश प्रसूतस्य सकाशात् अग्रजन्मनः। (भारत की महत्ता)
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥४८॥

भावार्थ—इस देश में उत्पन्न होने वाले ऋषियों से ही पृथ्वी पर सभी मनुष्यों ने अपने-अपने कर्तव्यों की शिक्षा ग्रहण की।

अल्पानाम् अपि वस्तूनाम् संहतिः कार्यसाधिका (संघशक्ति)
तृणैः गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ॥४९॥

भावार्थ—थोड़ी-थोड़ी वस्तुओं का संग्रह करने से ही मनुष्य अपनी कार्य सिद्धि कर सकता है। तिनकों को यदि इकट्ठा कर दिया जाता है तो उससे मस्त हाथी भी बांध लिये जाते हैं।

श्रोत्रं श्रुतेनैव न च कुण्डलेन,
दानेन पाणिर्न तु कंकणेन।
विभाति कायः खलु सज्जनाम्
परोपकारेण न चन्दनेन ॥५०॥

भावार्थ—सद्ग्रन्थों के श्रवण से ही कानों की शोभा होती है कुण्डलों से नहीं। दान से ही हाथों की शोभा होती है, कंगन पहिनने से नहीं। इसी प्रकार सज्जनों का शरीर परोपकार से ही शोभित होता है न कि चन्दन के लेप करने से।

भवन्ति नम्रास्तरवः फलोद्गमैः, (सत्पुरुष)
नवाम्बुभिर्भूरवलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः,
स्वभाव एवैष परोपकारिणाम् ॥५१॥

भावार्थ—फल आने पर वृक्ष भी नीचे की ओर झुक जाते हैं, नदी जल भर जाने पर मेघ भी पृथ्वी की ओर झुक जाते हैं। इसी प्रकार अच्छे पुरुष या समृद्धिशाली होने पर उद्धत नहीं होते अपितु और झुक जाते हैं। परोपकारियों का यही स्वभाव होता है।

परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः। (परोपकार)
परोपकाराय दुहन्ति गावः, परोपकारार्थमिदम् शरीरम् ॥५२॥

भावार्थ—दूसरों के कल्याण के लिए वृक्ष फल देते हैं, नदियाँ बहती हैं, गायें दूध देती हैं। इस प्रकार परोपकारी व्यक्ति का शरीर भी दूसरों के कल्याण के लिए ही होता है।

श्रूयताम् धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्। (अहिंसा)
आत्मनः प्रतिकूलानि, परेषाम् न समाचरेत् ॥५३॥

भावार्थ—धर्म का निचोड़ सुनिये और सुनकर हृदय में धारण कीजिए कि अपने प्रति जो काम प्रतिकूल हों उन्हें दूसरे के साथ कभी नहीं करना चाहिये।

मातेव रक्षति पितेव हिते नियुङ्क्ते, (विद्या)
कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिम्
किं किं न साधयति कल्पलतेव विद्या ॥५४॥

भावार्थ—कल्पलता के समान विद्या मनुष्य के किन-किन कामों को सिद्ध नहीं करती, वह माता के समान रक्षा करती है। पिता के समान हित में लगाती है पत्नी के समान दुख को दूर करके मन को प्रसन्न करती है। लक्ष्मी में वृद्धि करती है दिशाओं में कीर्ति को फैलाती है।

अपूर्वः कोऽपि कोषोऽयं विद्यते तव भारति। (विद्या)
व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ॥५५॥

भावार्थ—हे सरस्वती ! तुम्हारा यह विद्या रूपी खजाना भी कोई अनोखा ही खजाना है जो खर्च करने पर बढ़ता है और जोड़ने पर नष्ट हो जाता है।

अष्टादश पुराणेषु व्यासस्य वचन द्वयम्। (परोपकार, पाप)
परोपकारः पुण्याय, पापाय परपीडनम् ॥५६॥

भावार्थ—अठारह पुराणों में महर्षि व्यास ने दो ही बातें कहीं हैं। वे हैं—पुण्य के लिये परोपकार करो और पाप के लिए दूसरों को पीड़ा पहुंचाओ।

हीयते च मतिस्तात, हीनैः सह समागमात्। (संगति)
समैश्च समतामेति विशिष्टैश्च विशेषताम् ॥५७॥

भावार्थ—हीन व्यक्तियों के साथ उठने-बैठने से मनुष्य की बुद्धि भी हीन हो जाती है। बराबर के लोगों के साथ बैठने से उन जैसी ही बुद्धि होती है और विशिष्ट जनों के सम्पर्क में आने से बुद्धि में भी वैशिष्ट्य आता है।

जाड्यं धियो हरति सिंचति वाचि सत्यम्, (सत्संगति)
मनोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्संगतिः कथय किं न करोति पुंसाम् ॥५८॥

भावार्थ—बुद्धि की जड़ता को दूर करती है, वाणी में सत्यता आती है प्रतिष्ठा और उन्नति को बढ़ाती है, पापों को दूर करती है, चित्त को प्रसन्न करती है, दिशाओं में कीर्ति को फैलाती है। बताइये; सत्संगति मनुष्य का क्या-क्या कल्याण नहीं करती।

विद्या विनय सम्पन्ने ब्राह्मणे गवि हस्तिनि (विश्वबन्धुत्व)
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥५९ ॥

भावार्थ—विद्या और विनय से युक्त ब्राह्मण में, गाय में, हाथी में, कुत्ते में, और चाण्डाल में विद्वान् लोग एक समान देखते हैं।

आहार, निद्रा, भय, मैथुनम् च (धर्म)
समान्यमेतत् पशुभिः नराणाम्।
धर्मो हि तेषाम् अधिको विशेषो,
धर्मेण हीनाः पशुभिः समानाः ॥६० ॥

भावार्थ—भोजन करना, सोना, डरना और सम्भोग करना ये चारों बात पशुओं में भी समान ही होती हैं। मनुष्यों में धर्म करने की प्रवृत्ति ही एक विशेषता होती है इसलिए धर्म से रहित मनुष्य पशुओं के समान ही होता है।

धृति क्षमा दमोऽस्तेयं, शौचमिन्द्रिय निग्रहः। (धर्म)
धी विद्या सत्यमक्रोधो दशकं धर्म लक्षणम् ॥६२ ॥

भावार्थ—धैर्य, क्षमा, दमन, चोरी न करना, शुद्धता, इन्द्रियों को वश में रखना, बुद्धिमान् होना, विद्या पढ़ना, सत्य बोलना, क्रोध न करना ये धर्म के दस लक्षण हैं।

त्याज्यं न धैर्यम् विधुरेऽपि काले (धैर्य)
धैर्यात् कदाचित् स्थितिमाप्नुयात् सः।
जाते समुद्रेऽपि हि पोत भंगे,
सांयात्रिकः वाँच्छति तर्तुमेव ॥६२ ॥

भावार्थ—संकट के समय भी मनुष्य को धैर्य नहीं छोड़ना चाहिए। शायद धैर्य से स्थिति पर काबू पा लिया जाये। समुद्र में जहाज के डूबने की स्थिति में भी जहाज चलाने वाला तैर कर किनारे पर पहुँचने का प्रयत्न करता ही है।

हीनांगान् अतिरिक्तांगान् विद्याहीनान् वयोऽधिकान् (विकलांग)
रूपद्रव्य विहीनांश्च, जाति हीनांश्च नाक्षिपेत् ॥६३ ॥

भावार्थ—अंशहीन या जिसके अधिक अंग हों, जो विद्या से हीन हों, जो आयु में अधिक हों जो रूप हीन हों, धन हीन हों, जातिहीन हों, ऐसे व्यक्तियों पर व्यंग नहीं करना चाहिए।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः　　　(नारीमहत्त्व)
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्रऽफलाः क्रियाः ॥६४॥

भावार्थ—जहाँ स्त्रियों का आदर होता है वहाँ देवता निवास करते हैं। जहाँ स्त्रियों का आदर नहीं होता वहाँ के समस्त शुभ कार्य निष्फल होते हैं।

न कश्चित् कस्यचिन्मित्रम् न कश्चित् कस्यचिद्रिपुः　　　(व्यवहार)
व्यवहारेणैव मित्राणि जायन्ते रिपवस्तथा ॥६५॥

भावार्थ—न कोई किसी का मित्र होता है और न कोई किसी का शत्रु होता है। मनुष्य अपने व्यवहार से ही मित्र और शत्रु पैदा कर लेता है।

दुर्जनेन समं प्रीतिं वैरं चापि न कारयेत्।　　　(कुसंगतिः)
उष्णो दहति चाँगारः शीतः कृष्णायते करम् ॥६६॥

भावार्थ—दुष्ट के साथ वैर नहीं करना चाहिए। क्योंकि आग का अंगारा जलता हुआ होगा तो हाथ जला देगा और यदि ठण्डा हुआ तो हाथ काले कर देगा।

असम्भवं हेम मृगस्य जन्म तथापि रामो लुलुभे मृगाय　(आपत्तिकाल)
प्रायः समापन्न विपत्ति काले धियोऽपि पुंसाम् मलिनी भवन्ति ॥६७॥

भावार्थ—सोने के हिरण का जन्म असम्भव है तो भी राम सोने के हिरण को देखकर ललचा गये। विपत्ति का समय आने पर बुद्धिमान् पुरुषों की बुद्धि भी नष्ट हो जाती है।

नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः।　　　(पराक्रम)
विक्रमार्जितराज्यस्य, स्वयमेव मृगेन्द्रता ॥ ६८ ॥

भावार्थ—वन्य पशुओं द्वारा सिंह का न तो राज्याभिषेक किया जाता है और न राज्याभिषेक के अन्य संस्कार ही किये जाते हैं। अपने शौर्य और पराक्रम से वह अपना राज्य स्थापित करता है इसलिए अपने पराक्रम से स्थापित राज्य को मृगेन्द्रता स्वयं सिद्ध होती है। अर्थात् शेर को जगल का राजा कोई बनाता नहीं है अपितु वह स्वयं बनता है।

राजहंस
संस्कृत निबन्ध

डॉ. आर. एन. गौड़

